# Sri Mahaganapati Murti Vaibhavam

www.kamakotimandali.com

बालस्तरुणभक्तौ च वीरः शक्तिर्द्विजस्तथा |
सिद्ध उच्छिष्ट विघनेशौ क्षिप्रो हेरम्बनामकः ||
लक्ष्मीगणपतिश्चैव महाविघनेश्वरस्तथा |
विजयः कल्पनृत्तश्चाप्यूर्ध्व विघनेश उच्यते ||
एकाक्षरो वरश्चैव त्र्यक्षरः क्षिप्रदायकः |
हरिद्राख्यश्चैकदन्तः सृष्टिरुद्दण्डनामकः ||
ऋणमोचनको ढुण्ढिर्द्विमुखस्त्रिमुखस्तथा |
सिंहो योगश्च दुर्गा च देवः सङ्कटहारकः ||

**१ बालगणपतिः**

करस्थ कदलीचूतपनसेक्षुकमोदकम् |
बालसूर्यनिभं वन्दे देवं बालगणाधिपम् ||

**२ तरुणगणपतिः**

पाशाङ्कुशापूपकपित्थजम्बू-
स्वदन्तशालीक्षुमपि स्वहस्तैः |
धत्ते सदा यस्तरुणारुणाभः
पायात् स युष्मांस्तरुणो गणेशः ||

**३ भक्तगणपतिः**

नारिकेळाम्रकदलीगुडपायसधारिणम् ।
शरच्चन्द्राभवपुषं भजे भक्तगणाधिपम् ॥

**४ वीरगणपतिः**

वेतालशक्तिशरकार्मुकचक्रखड्ग-
खट्वाङ्गमुद्गरगदाङ्कुशनागपाशान् ।
शूलं च कुन्तपरशुं ध्वजमुद्वहन्तं
वीरं गणेशमरुणं सततं स्मरामि ॥

**५ शक्तिगणपतिः**

आलिङ्ग्य देवीं हरिताङ्गयष्टिं
परस्पराश्लिष्टकटिप्रदेशम् ।
सन्ध्यारुणं पाशसृणी वहन्तं
भयापहं शक्तिगणेशमीडे ॥

**६ द्विजगणपतिः**

यं पुस्तकाक्षगुणदण्डकमण्डलु श्री-
विद्योतमानकरभूषणमिन्दुवर्णम् ।
स्तम्बेरमाननचतुष्टयशोभमानं
त्वां यः स्मरेत् द्विजगणाधिपते स धन्यः ॥

**७ सिद्धगणपतिः**

पक्वचूतफलपुष्पमञ्जरी-
रिक्षुदण्डतिलमोदकैः सह ।

उद्वहन् परशुमस्तु ते नमः
श्रीसमृद्धियुत हेमपिङ्गल ||

**८ उच्छिष्टगणपतिः**

नीलाब्जदाडिमीवीणाशालिगुञ्जाक्षसूत्रकम् |
दधदुच्छिष्टनामायं गणेशः पातु मेचकः ||

**९ विघनगणपतिः**

शङ्खेक्षुचापकुसुमेषुकुठारपाश-
चक्रस्वदन्तसृणिमञ्जरिकाशराद्यैः |
पाणिश्रितैः परिसमीहितभूषणश्री-
विघनेश्वरो विजयते तपनीयगौरः ||

**१० क्षिप्रगणपतिः**

दन्तकल्पलतापाशरत्नकुम्भाङ्कुशोज्ज्वलम् |
बन्धूककमनीयाभं ध्यायेत् क्षिप्रगणाधिपम् ||

**११ हेरम्बगणपतिः**

अभयवरदहस्तः पाशदन्ताक्षमाला-
सृणिपरशु दधानो मुद्गरं मोदकं च |
फलमधिगतसिंहः पञ्चमातङ्गवक्त्रो
गणपतिरतिगौरः पातु हेरम्बनामा ||

**१२ लक्ष्मीगणपतिः**

बिभ्राणः शुकबीजपूरकमिलन्माणिक्यकुम्भाङ्कुशान्
पाशं कल्पलतां च खड्गविलसज्ज्योतिस्सुधानिर्झरः ।
श्यामेनात्तसरोरुहेण सहितं देवीद्वयं चान्तिके
गौराङ्गो वरदानहस्तसहितो लक्ष्मीगणेशोऽवतात् ॥

**१३ महागणपतिः**

हस्तीन्द्राननमिन्दुचूडमरुणच्छायं त्रिनेत्रं रसा-
दाश्लिष्टं प्रियया सपद्मकरया स्वाङ्कस्थया सन्ततम् ।
बीजापूरगदेक्षुकार्मुकलसच्चक्राब्जपाशोत्पल-
व्रीह्यग्रस्वविषाणरत्नकलशान् हस्तैर्वहन्तं भजे ॥

**१४ विजयगणपतिः**

पाशाङ्कुशस्वदन्ताम्रफलवानाखुवाहनः ।
विघ्नं निहन्तु नः सर्वं रक्तवर्णो विनायकः ॥

**१५ नृत्तगणपतिः**

पाशाङ्कुशापूपकुठारदन्त-
चञ्चत्कराक्लृप्तवराङ्गुलीकम् ।
पीतप्रभं कल्पतरोरधस्थं
भजामि नृत्तोपपदं गणेशम् ॥

**१६ ऊर्ध्वगणपतिः**

कल्हारशालिकमलेक्षुकचापबाण-
दन्तप्ररोहकगदी कनकोज्ज्वलाङ्गः ।

आलिङ्गनोद्यतकरो हरिताङ्गयष्ट्या
देव्या करोतु शुभमूर्ध्वगणाधिपो मे ||

**१७ एकाक्षर गणपतिः**

रक्तो रक्ताङ्गरागाङ्कुशकुसुमयुतस्तुन्दिलश्चन्द्रमौलिः
नेत्रैर्युक्तस्त्रिभिर्वामनकरचरणो बीजपूरं दधानः |
हस्ताग्राक्लृप्त पाशाङ्कुशरदवरदो नागवक्त्रोऽहिभूषो
देवः पद्मासनस्थो भवतु सुखकरो भूतये विघनराजः ||

**१८ वरगणपतिः**

सिन्दूराभमिभाननं त्रिनयनं हस्ते च पाशाङ्कुशौ
बिभ्राणं मधुमत्कपालमनिशं साध्विन्दुमौलिं भजे |
पुष्ट्याश्लिष्टतनुं ध्वजाग्रकरया पद्मोल्लसद्धस्तया
तद्योन्याहित पाणिमात्तवसुमत्पात्रोल्लसत्पुष्करम् ||

**१९ त्र्यक्षर गणपतिः**

गजेन्द्रवदनं साक्षाच्चलत्कर्णसुचामरं
हेमवर्णं चतुर्बाहुं पाशाङ्कुशधरं वरम् |
स्वदन्तं दक्षिणे हस्ते सव्ये त्वाम्रफलं तथा
पुष्करैर्मोदकं चैव धारयन्तमनुस्मरेत् ||

**२० क्षिप्रप्रसाद गणपतिः**

धृतपाशाङ्कुशकल्पलता स्वरदश्च बीजपूरयुतः
शशिशकलकलितमौलिस्त्रिलोचनोऽरुणश्च गजवदनः |

भासुरभूषणदीप्तो बृहदुदरः पद्मविष्टरोल्लसितः
विघनपयोधरपवनः करधृतकमलः सदास्तु मे भूत्यै ||

**२१ हरिद्रागणपतिः**

हरिद्राभं चतुर्बाहुं करीन्द्रवदनं प्रभुम् |
पाशाङ्कुशधरं देवं मोदकं दन्तमेव च |
भक्ताभयप्रदातारं वन्दे विघनविनाशनम् ||

**२२ एकदन्त गणपतिः**

लम्बोदरं श्यामतनुं गणेशं
कुठारमक्षस्रजमूर्ध्वगात्रम् |
सलड्डुकं दन्तमधःकराभ्यां
वामेतराभ्यां च दधानमीडे ||

**२३ सृष्टिगणपतिः**

पाशाङ्कुशस्वदन्ताम्रफलवानाखुवाहनः |
विघनं निहन्तु नः शोणः सृष्टिदक्षो विनायकः ||

**२४ उद्दण्डगणपतिः**

कल्हाराम्बुजबीजपूरकगदादन्तेक्षुचापं सुमं
बिभ्राणो मणिकुम्भशालिकलशौ पाशं सृणिं चाब्जकम् |
गौराङ्ग्या रुचिरारविन्दकरया देव्या समालिङ्गितः
शोणाङ्गः शुभमातनोतु भजतामुद्दण्डविघनेश्वरः ||

**२५ ऋणमोचकगणपतिः**

पाशाङ्कुशौ दन्तजम्बु दधानः स्फटिकप्रभः |
रक्तांशुको गणपतिर्मुदे स्यादृणमोचकः ||

**२६ ढुण्ढिगणपतिः**

अक्षमालां कुठारं च रत्नपात्रं स्वदन्तकम् |
धत्ते करैर्विघनराजो ढुण्ढिनामा मुदेऽस्तु नः ||

**२७ द्विमुख गणपतिः**

स्वदन्तपाशाङ्कुशरत्नपात्रं
करैर्दधानो हरिनीलगात्रः |
रक्तांशुको रत्नकिरीटमाली
भूत्यै सदा मे द्विमुखो गणेशः ||

**२८ त्रिमुख गणपतिः**

श्रीमत्तीक्ष्णशिखाङ्कुशाक्षवरदान् दक्षे दधानः करैः
पाशं चामृतपूर्णकुम्भमभयं वामे दधानो मुदा |
पीठे स्वर्णमयारविन्दविलसत्सत्कर्णिकाभासुरे
स्वासीनस्त्रिमुखः पलाशरुचिरो नागाननः पातु नः ||

**२९ सिंहगणपतिः**

वीणां कल्पलतामरिं च वरदं दक्षे विधत्ते करैः
वामे तामरसं च रत्नकलशं सन्मञ्जरीं चाभयम् |
शुण्डादण्डलसन्मृगेन्द्रवदनः शङ्खेन्दुगौरः शुभो

दीव्यद्रत्ननिभांशुको गणपतिः पायादपायात् स नः ||

**३० योगगणपतिः**

योगारूढो योगपट्टाभिरामो
बालार्काभश्चन्द्रनीलांशुकाढ्यः |
पाशेक्ष्वक्षान् योगदण्डं दधानो
पायान्नित्यं योगविघ्नेश्वरो नः ||

**३१ दुर्गागणपतिः**

तप्तकाञ्चनसङ्काशश्चाष्टहस्तो महत्तनुः
दीप्ताङ्कुशं शरं चाक्षं दन्तं दक्षे वहन् करैः |
वामे पाशं कार्मुकं च लतां जम्बु दधत्करैः
रक्तांशुकः सदा भूयाद्दुर्गागणपतिर्मुदे ||

**३२ सङ्कष्टहरगणपतिः**

बालार्कारुणकान्तिर्वामे बालां वहन्नङ्के
लसदिन्दीवरहस्तां गौराङ्गीं रत्नशोभाढ्याम् |
दक्षेऽङ्कुशवरदानं वामे पाशं च पायसं पात्रं
नीलांशुकलसमानः पीठे पद्मारुणे तिष्ठन् ||

**३३ व्योमगणपतिः**

कल्हारेक्षुशरासनं च परशुं पुष्पेषुपद्मौ करैः
बिभ्राणं शशिशेखरं जगमुखं चेन्दुप्रभं तुन्दिलम् |
नानारत्नविचित्रभूषणयुतं श्वेताम्बरालङ्कृतं

ध्यायेद्व्योमसरस्वतीयुतमहं तं व्योमविघ्नेश्वरम् ||

**३४ शारदागणपतिः**

पद्मव्रीह्यभितोमरं गुणवरं परशुं च पाशाङ्कुशौ
चूतं दण्डसुदाडिमीकनकयुक्कुम्भं दधानं करैः |
श्लिष्टं शारदया सपद्मकरया नीहारकान्त्या सितं
नागास्यं स्मितवक्त्रमिन्दुमुकुटं तं शारदेशं भजे ||

**३५ यक्षगणपतिः**

स्वर्णवर्णकळेवरं गजमस्तकं शशिशेखरं
बिभ्रतं गुणमङ्कुशं वरदाभये निजबाहुभिः |
सव्यसग्धिगयक्षिणीमुखपद्मभृङ्गनिजेक्षणं
यक्षसंज्ञगणेश्वरं नयनत्रयं हृदि चिन्तये ||

**३६ मोदगणपतिः**

करैरङ्कुशं दन्तपाशौ दधानं
वराख्यं बृहन्मोदकं पुष्करे च |
गजास्यं सदानन्दवाणीसमेतं
सुधांशुप्रभं मोदसंज्ञं भजेऽहम् ||

**३७ प्रमोदगणपतिः**

ध्यायेत् शारदशीतभानुसदृशं वामाङ्कगा सुन्दरी-
वक्षोजार्पितपुष्करं शशिधरं श्वेताम्बरं सुन्दरम् |
बिभ्राणं युगबाहुभिश्च कमलं पाशाङ्कुशौ मोदकं

नागास्यं सततं प्रमोदगणपं स्वानन्दलक्ष्मीयुतम् ||

**३८ गौरीगर्भोद्भव गणपतिः**

सन्ध्यामेघसुबन्धुजीवकनिभं पाशाङ्कुशौ पङ्कजं
बिभ्राणं परशुं करैः शशिधरं नागास्यमाखुध्वजम् |
गौरीगर्भसमुद्भवं त्रिनयनं दन्तद्वयेनान्वितं
ध्यायेऽहं तिलकोज्ज्वलं गणपतिं सिन्दूरदैत्यान्तकम् ||

**३९ श्वेतगणपतिः**

नागास्यं शशिशेखरं त्रिनयनं श्वेताम्बरालङ्कृतं
पीयूषं च करिर्दधानमनिशं पद्माङ्कुशौ मुद्गरम् |
विष्ण्वाद्यैरपि पूजितं सुरवरैः पीयूशमूर्तिं प्रभुं
श्वेताख्यं गणनायकं स्वकमलावाणीसमेतं भजे ||

**४० ज्येष्ठराजगणपतिः**

दिग्बाहुं सुन्दराङ्गं हरिशिवभुवनासूर्यसंसेव्यमानं
कोट्यण्डायातकेशैर्निबिडनिजसभं वीक्ष्यमाणे भ्रुभङ्गैः |
ध्याये सिंहासनस्थं धवलतरतनुं चन्द्रचूडं त्रिनेत्रं
नागास्यं ज्येष्ठराजं मम हृदि सहितं श्रीविराज्ञ्या स्वराज्ञ्या ||

**४१ त्रिमूर्तिगणपतिः**

शङ्खं शूलकमण्डलुं च डमरुं चक्राक्षमाले करैः
बिभ्राणं शशिशेखरं त्रिनयनं शेषासनं वामतः |
मध्ये दक्षिणतश्च केशवदनं शुभ्राभदेहं प्रभुं

हेमश्यामहळक्ष्वक्त्रमनिशं ध्याये त्रिवक्त्राभिदम् ||

**४२ मोदकप्रियगणपतिः**

शालीमुद्गसुशर्करादधिघृतान्यन्नानि सन्मोदकं
लड्डूकाम्रसुनारिकेलकदलीसुस्वादुकान् पुष्करे |
कस्तूरीतिलकं सुखासनगतं रक्ताङ्गरागाम्बरं
सिन्दूरारुणविग्रहं गजमुखं पीतोत्तरीयं प्रभुम् |
नानावर्णविचित्ररत्नकुसुमस्रक्षोभितं सुन्दरं
देवं चेतसि मोदकप्रियमहं नेत्रत्रयं चिन्तये ||

**४३ धूमकेतु गणपतिः**

रक्ताभं परशुं च चक्रकमले शङ्खं करैर्बिभ्रतं
स्वीयास्यादनलं वमन्तमनिशं धूमध्वजं बालकम् |
धूमस्यैव वधाय माधवसुतत्वेनावतीर्णं प्रभुं
नागास्यं द्विरदान्वितं शशिधरं तं धूमकेतुं भजे ||

**४४ स्तूलदन्तगणपतिः**

नीलाभं चन्द्रचूडं स्मरशतसदृशं हस्तिवक्त्रं त्रिनेत्रं
शुण्डायां पुष्पहारं परशुसरसिजे चारु शङ्खं च चक्रम् |
बिभ्राणं बाहुपद्मैः नवमणिखचितैः स्थूलदन्तद्वयाढ्यं
वाग्भूत्या विश्वभूत्या सहितमजसुतं स्थूलदन्तं भजेऽहम् ||

**४५ श्वेतार्कगणपतिः**

बीजापूरगुणाङ्कुशौ स्वरदनं हस्ताम्बुजैर्बिभ्रतं

भास्वद्धेमयुताग्रशुभ्रवसनं श्वेतार्कमूलोद्भवम् |
देवं मूषिकवाहनं गजमुखं कन्दर्पकोटिप्रभं
श्वेताभं शशिशेखरं त्रिनयनं श्वेतार्कदेवं भजे ||

**४६ विघनराज गणपतिः**

शङ्खं चक्राङ्कुशौ स्वैः कुसुमशरगुणेस्वेक्षुचापं कुठारं
शालीगुच्छं कराब्जैर्दधतमथ सदा मूषकारूढमीशम् |
स्वर्णाभं चन्द्रचूडं त्रिनयनसहितं सिद्धलक्ष्म्या च वागी–
श्वर्या युक्तं गजवरवदनं विघनराजं भजेऽहम् ||

**४७ अग्निगणपतिः**

विषाणं च सन्मोदकं सर्पिपात्रं
सुशक्तिं दधानं लसत्स्वर्णवर्णम् |
धरन्तं करैः रत्नकुम्भं गजास्यं
भजे रूपलक्ष्मीयुतं वह्निसंज्ञम् ||

**४८ सहस्रनेत्र कुणिताक्ष गणपतिः**

विन्यस्तवामभुजसंशोभिजानुसहितं वज्रतीक्ष्णपरशू ज्ञानाभिधानमुद्रां
दधानमथ पीताम्बरं शशिधरम् |
भिन्नेन्द्रनीलनिभवर्णं सहस्रकुणिताक्षाङ्गकं गजमुखं सिंहासने विधृत
वीरासनं च कुणिताभिधं हृदि भजे ||

**४९ मोक्षगणपतिः**

मुक्तावर्णं गजवरमुखं चन्द्रचूडं त्रिनेत्रं

मोक्षाधीशं वरमभयदं ह्यङ्कुशं पाशवर्यम् |
सिद्ध्या बुद्ध्या च सहितमजं मोक्षशब्दान्विताभ्यां
ध्याये नित्यं रदयुगयुतं चाविमुक्तं गणेशम् ||

**५० ओङ्कारगणपतिः**

सिन्दूरारुणविग्रहं स्ववरदं दन्तं च पाशाङ्कुशौ
बिभ्राणं वरदाडिमं तमभये सन्मोदकं पुष्करे |
ओङ्काराख्य सरस्वती सहितया ह्योङ्कारलक्ष्मीयुतं
ओङ्काराख्यगणाधिपं गजमुखं ह्योङ्कारपीठे स्थितम् ||

**५१ विकटगणपतिः**

मालां मोदकपङ्कजस्वपरशून् हस्ताम्बुजैः बिभ्रतं
मुक्तादामलसद्गळं शशिधरं नेत्रत्रयं तुन्दिलम् |
रत्नं निर्वृतिशान्तियुक्तमिभकं चिन्तामणीभूषितं
ध्याये श्रीविकटाभिधं गणपतिं दिव्याम्बरालङ्कृतम् ||

**५२ कपिलगणपतिः**

मालां मोदकपङ्कजस्वपरशून् हस्तैर्दधानं प्रभुं
स्वर्णाभं वदने सुधांशुमुकुटं कालाम्बुदाभं तनौ |
नागास्यं भज योगशब्दयुतया सिद्ध्या तथा विद्यया
संयुक्तं कपिलाभिधं गणपतिं चिन्तामणीभूषितम् ||

**५३ रत्नगर्भ गणपतिः**

ध्याये श्रीनवरत्नदेहमिभकं चिन्तामणीभूषणं

बिभ्राणं नवरत्नकं नवकरैश्चन्द्रावतम्सं प्रभुम् |
नागास्यं नवशक्तिभिश्च निधिभिः लक्ष्म्या तथा विद्यया
संयुक्तं हृदि रत्नगर्भगणपं नेत्रत्रयं तुन्दिलम् ||

**५४ कालगणपतिः**

जपापुष्पभासं स्वपाशाङ्कुशाढ्यं
वराभीतिहस्तं रदं चाभये तु |
दधानं च कालं गजेन्द्राननं तं
भजे विघननाथं निशानाथचूडम् ||

**५५ सुमुख गणपतिः**

बीजापूरविषाणदण्डकमलान् चापोत्पले सद्रुजां
पाशं चक्रसरोजरत्नकलशान् हस्तैर्दधानं प्रभुम् |
नागास्यं च सुसिद्धिबुद्धिसहितं बन्धूकपुष्पप्रभं
ध्याये श्रीसुमुखं सदापि भुवनेशान्या मनोभीष्टदम् ||

**५६ एकदन्तगणपतिः**

रक्तं रक्ताम्बराढ्यं त्रिनयनसहितं चन्द्रचूडं कराब्जैः
पाशं चैवाङ्कुशाढ्यं वरदमभयके दन्तखण्डं वहन्तम् |
विद्यामायाभिधाभ्यां सहितमथ महाशब्दयुग्भ्यां प्रियाभ्यां
स्वारूढं ब्रह्मरूपं विधिमुखवरदं चैकदन्तं नमामि ||

**५७ चिन्तामणिगणपतिः**

नागास्यं स्वकरैः सरोजपरशू मालां बृहन्मोदकं

नानारत्नविचित्रितं निजगळे चिन्तामणीभूषणम् |
बिभ्राणं हृदि बन्धुजीवकनिभं चिन्तामणीनायकं
चिन्तापूर्वसरस्वतीयुत महालक्ष्मीसमेतं भजे ||

**५८ वक्रतुण्ड गणपतिः**

बन्धूकारुणमिन्दुचूडमुडुयुक् व्योमाभसव्यानकं
रक्ताधोवसनं गजेन्द्रवदनं खड्गं धनुः खेटकम् |
शक्तिं बाहुभिरादधानमनिशं तं वक्रतुण्डाभिधं
केशानुग्रहकारकं प्रकृतिविद्याभ्यां युतं भावये ||

**५९ सन्तानगणपतिः**

बिभ्राणं ह्यभये रदं च वरदे नीलोत्पलं चाङ्कुशं
पाशं चन्द्रधरं गजाननमजं देवीकुचे पुष्करम् |
स्वर्णाभं स्मरकोटिसुन्दरतनुं पीताम्बरालङ्कृतं
सन्तानाख्य गणाधिपं हृदि भजे सन्तानलक्ष्मीयुतम् ||

**६० सत्यगणपतिः**

सिन्दूरारुणविग्रहं स्वरदनं पाशाङ्कुशौ मालिकां
बिभ्राणं निजबाहुभिर्गजमुखं सर्पोदराबन्धनम् |
मुक्तादामयुतं च सत्यगणपं ब्रह्मात्मजं भावये
देवं सत्यसरस्वतीसहितया श्रीसत्यलक्ष्मीयुतम् ||

**६१ कल्पकगणपतिः**

शूलं चक्रधनुर्गदाश्च दधतं सत्कल्पवल्लीयुतं

दन्तं व्रीह्यसितोत्पलं गुणवरं पद्मं स्वदिग्बाहुभिः |
हस्तीन्द्रननमिन्दुचूडमरुणच्छायं त्रिनेत्रान्वितं
ध्याये कल्पकमद्य कल्पकमहावाणीरमासंयुतम् ||

**६२ आशापूरक गणपतिः**

आशापूरगणाधिपं गजमुखं बन्धूकपुष्पप्रभं
सिन्दूरारुणमस्तकं शिखिरथं सर्पोदराबन्धनम् |
आशापूरसरस्वतीसहितयाऽशापूरलक्ष्म्या युतं
मुक्तादामविभूषणं दशभुजं दिव्याम्बरं चिन्तये ||

**६३ आज्ञागणपतिः**

जानुन्यस्तकरं वरेक्षुसहितं सज्ज्ञानमुद्रान्वितं
बिभ्राणं सहकारपल्लववरं सिंहासने संस्थितम् |
साम्राज्ञ्या कनकाभया हृदि महाराज्ञ्या च संशोभितं
चन्द्राभं गजवक्त्रमिन्दुमकुटं चाज्ञागणेशं भजे ||

**६४ गौरीमलोद्भव गणपतिः**

पाशं मोदकमङ्कुशं स्वरदनं दोर्भिर्दधानं प्रभुं
शुण्डायां पृथुनारिकेलसहितं नीलोत्पलश्रीयुतम् |
पार्श्वे संस्थित तुष्टिपुष्टिसहितं नागाननं तुन्दिलं
तं गौरीमलसम्भवं शशिधरं भग्नैकदन्तं भजे ||

**६५ स्वर्णाकर्षण गणपतिः**

स्वर्णाभं वरदाभये गजमुखं पाशाङ्कुशौ बिभ्रतं

गेहे स्वर्णमये स्थितं शशिधरं पीताम्बरं सुन्दरम् ।
नित्यं ऋद्धिसमृद्धियुक्तमनिशं शङ्खादिभिः सेवितं
स्वर्णाकिर्षणनामकं च वसुमत्याद्यावृतं चिन्तये ॥

**६६ षण्मुख गणपतिः**

षण्मातङ्गमुखं सुधांशुमकुटं पाशाङ्कुशौ कुक्कुटं
शक्तिं वज्रधनू वराभयकरं शूलासिखेटान् गदाम् ।
बिभ्राणं नवबन्धुजीवकनिभं नेत्रत्रयं तुन्दिलं
देदीप्यान्मणिहारभूषणरुचं श्रीषण्मुखाख्यं भजे ॥

**६७ सिद्धिगणपतिः**

मत्र्यास्यं मणिपादुकं शशिधरं सिद्धाञ्जनं बिभ्रतं
हस्ताब्जैर्वरयोगदण्डभसिते गन्धं च दिव्यप्रभम् ।
कौपीनं कटिसूत्रकं च तिलकं नेत्रत्रयं सुन्दरं
सिद्धाख्यं भज सर्वसिद्धियुतया श्रीसर्वबुद्ध्या युतम् ॥

**६८ लम्बोदर गणपतिः**

रक्ताभं वरदाभये स्वरदनं सद्दाडिमं बिभ्रतं
शुण्डायां पृथु मोदकं च सततं पाशाङ्कुशौ बाहुभिः ।
नागास्यं हृदि वेदमातृसहितं श्रीकेशमात्रायुतं
कोट्यण्डायुतपूर्णनैजजठरं लम्बोदरं चिन्तये ॥

**६९ शूर्पकर्ण गणपतिः**

चूतादीनि दशायुधानि च करैः स्वैर्दक्षिणाद्यैः क्रमात्

बिभ्राणं धवलप्रभं मणिमये सिंहासने संस्थितम् |
मेधादेविमुखं गणाष्टकलसत्पार्श्वद्वयं तुन्दिलं
नागास्यं भज भग्नवामरदनं तं शूर्पकर्णं भजे ||

**७० बीजगणपतिः**

नागास्यं चन्द्रचूडं त्रिनयनसहितं रत्नपीठे निषण्णं
रक्तं पाशाङ्कुशाढ्यं ह्यभयवरदके दन्तसद्बीजपूरे |
बिभ्राणं बाहुपद्मैः पृथुतरजठरं पीतकौशेयवस्त्रं
ध्याये श्रीबीजसंज्ञं मम हृदि सततं बीजवाणीरमाभ्याम् ||

**७१ महोदर गणपतिः**

नागास्यं चन्द्रचूडं स्फटिकमणिनिभं ज्ञानमुद्राक्षसूत्रं
पाशं तीक्ष्णाङ्कुशाख्यं दधतमथकरैरासने वीरसंज्ञे |
तिष्ठंतं ज्ञानविद्यासहितमपि सदा ज्ञानसिद्ध्या समेतं
ध्याये श्रीबोधसंज्ञं महदुदरधरं चित्स्वरूपं गणेशम् ||

**७२ राजगणपतिः**

अश्वारूढं त्रिनेत्रं स्मरशतसदृशं धारयन्तं कराभ्यां
बिभ्राणं रत्नगुप्तैर्मणिमयकटकैरङ्गदैः रत्नहारैः |
भास्वन्तं स्वर्णवर्णं नवमणिमकुटं सुन्दरं राजविद्या-
लक्ष्मीयुक्तं स्मितास्यं मम हृदि सततं चिन्तये राजसंज्ञम् ||

**७३ मयूरेश गणपतिः**

हेमाभं रदनं वराभयकरं पाशं दधानं प्रभुं

स्वाङ्कस्थापित सिद्धिबुद्धिसहितं भग्नैकदन्तं भजे |
पञ्चानां जनकं तथैव जगतां माया परावैभवात्
नागास्यं सकलार्थदं गणपतिं श्रीमन्मयूरेश्वरम् ||

**७४ ज्ञानगणपतिः**

नागास्यं चन्द्रचूडं स्फटिकमणिनिभं ज्ञानमुद्राक्षसूत्रं
पाशं तीक्ष्णाङ्कुशाख्यं दधतमथकरैरासने वीरसंज्ञे
तिष्ठन्तं ब्रह्मविद्यासहितमपि सदा ज्ञानसिद्ध्या समेतं
ध्याये श्रीज्ञानसंज्ञं त्रिनयनसहितं दन्तयुग्माभिरामम् ||

**७५ बल्लाळ गणपतिः**

मालां मोदकपङ्कजस्वपरशून् दन्तं दधानं करैः
संयम्यैकपदं निपात्य हि परं चाधस्सुपीठे स्थितम् |
रक्तं काञ्चनमुद्रिकामहिवरं हस्तोदरे बिभ्रतं
बल्लाळेश गणाधिपं हृदि भजे पीताम्बरं सुन्दरम् ||

**७६ स्वानन्देश गणपतिः**

रक्ताम्भोधिस्थपोतोल्लसदरुणसरोजाधिरूढं त्रिनेत्रं
पाशं चैवाङ्कुशाढ्यं परशुमभयदं बाहुभिर्धारयन्तम् |
स्वानन्देशं गजास्यं पृथुतरजठरं सिद्धिबुद्धीसमेतं
रक्तं चन्द्रार्धमौलिं सकलभयहरं विघनराजं नमामि ||

**७७ महोत्कट गणपतिः**

दण्डं शूलकमण्डलू च डमरुं पाशाङ्कुशौ पङ्कजं

बिभ्राणं वरदाभये स्वपरशुं पञ्चास्यवाहं प्रभुम् ।
स्वर्णाभं शशिशेखरं त्रिनयनं कौशेयकं बिभ्रतं
मुक्तादाममहोत्कटं हृदि भजे श्रीसिद्धिबुद्धीयुतम् ॥

**७८ पुष्टिगणपतिः**

मुक्तामालाविभूषं नवमणिखचितैर्भूषणैर्भूषिताङ्गं
हस्ते पीयूषकुम्भं दधतमभिमुखं रक्तवर्णं त्रिनेत्रम् ।
पुष्ट्या युक्तं सरोजं गुणनिजरदनौ धारयन्तं कराब्जैः
विघनाधीशं गणेशं मणिमयमकुटं नौमि विश्वाधिनाथम् ॥

**७९ मन्दारगणपतिः**

स्वर्णाभं पीतवस्त्रं रदयुगसहितं लम्बकर्णं त्रिनेत्रं
पाशं चैवाङ्कुशाढ्यं वरदमभयदं बाहुभिर्धारयन्तम् ।
सर्वाभीष्टप्रदात्र्या सहितमपि तथा सर्वसङ्कष्टहन्त्र्या
युक्तं मन्दारदेवं गजवरवदनं मूषकारूढमीडे ॥

**८० नवनीतगणपतिः**

स्मेरास्यं नवनीततुल्यवपुषं पाशं स्वकं मुद्गरं
शुण्डायां पृथुमोदकं च दधतं श्वेताम्बरालङ्कृतम् ।
नागास्यं नवनीतनामकमजं कर्पूरपूजाप्रियं
ध्याये श्रीनवनीतपूर्वपदया वाण्या च लक्ष्म्या युतम् ॥

**८१ लक्षगणपतिः**

नानाचण्डांशुतुल्यं गजवरवदनं दिव्यगन्धानुलेपं

पाशं मालाङ्कुशाढ्यं निजवरपरशुं धारयन्तं त्रिनेत्रम् |
नानालङ्कारदीप्तं शशधरमकुटं लक्षपूर्वाभिधाभ्यां
सिद्ध्या बुद्ध्या समेतं सपदि शिखिरथं लक्षविघनेशमीडे ||

**८२ गव्यगणपतिः**

नागास्यं श्यामवर्णं मधुरदधिपयःपूर्णपात्रे कराब्जैः
लड्डूकं कल्पवल्लीं दधतमथ मुदा मोदकं पुष्करेण |
वाहत्वे कामधेनुं धवलतरधनुं धारयन्तं त्रिनेत्रं
बाह्यन्तश्शुद्धियुक्तं मम हृदि कलये गव्यसंज्ञं गणेशम् ||

**८३ मणिकर्णी गणपतिः**

पद्मं कल्हारपुष्पं निजकरकमलैरुत्पलं मोदकं च
हस्ते मालां दधानं नवमणिखचितैर्भूषणैर्भूषिताङ्गम् |
शुभ्राभं चन्द्रचूडं गजवरवदनं पुण्यदा पापहन्त्री
संराजत्पार्श्वयुग्मं मम हृदि कर्णीगणेशं भजेऽहम् ||

**८४ मुहूर्तगणपतिः**

स्वर्णाभं सन्दधानं वरदमभयदं पद्मयुग्मं कराभ्यां
देदीप्यत्पीतवस्त्रं मणिगणखचितैर्भूषणैर्भूषिताङ्गम् |
ज्योतिर्विद्यासमेतं गजवरवदनं चन्द्रचूडं त्रिनेत्रं
ज्योतिश्चक्रस्य मध्ये निलयमथ मुहूर्ताभिधं चिन्तयामि ||

**८५ कपर्दीश गणपतिः**

बिभ्राणं कमलं करैश्च परशुं पाशाङ्कुशौ तुन्दिलं

शुण्डाशोभि सुधाघटं शशिधरं देदीप्यमानप्रभम् |
गङ्गापूर्वसरस्वती परिलसद्वामाङ्ककं सुन्दरं
नागास्यं जटिलं कपर्दिगणपं ध्याये सुधांशुप्रभम् ||

**८६ पिङ्गळगणपतिः**

कन्दर्पानिन्ततुल्यं त्रिनयनसहितं तुन्दिलं स्मेरवक्त्रं
शुण्डादण्डे दधानं धवळतिलकृतं मोदकं चन्द्रचूडम् |
बिभ्राणं पक्क्वचूतं परशुमथ करैः कल्पवल्लीक्षुदण्डे
तं श्रीदेव्या समृद्ध्या सहितमिभमुखं पिङ्गळाख्यं भजेऽहम् ||

**८७ चतुर्दन्त गणपतिः**

शुण्डायां च सुधाघटं स्वपरशुं पाशाङ्कुशौ पङ्कजं
बिभ्राणं युगबाहुभिः शशिधरं शुभ्रांशुकोटिप्रभम् |
देदीप्यत्प्रभवेददन्तखचितैः रत्नैर्मनोज्ञप्रभं
नागास्यं ह्यनघाव्ययायुतमहं ध्याये चतुर्दन्तकम् ||

**८८ वामनगणपतिः**

चक्राब्जाङ्कुशपाशशङ्खपरशून् दन्तासिचापोरगान्
बिभ्राणं शिखिवाहनं शशिधरं मालालसत्पुष्करम् |
ह्रस्वग्रीवमिभाननं च जटिलं स्वर्णप्रभं सुन्दरं
ध्याये वामनसंज्ञकं ह्यणुमहद्रूपायुतं तुन्दिलम् ||

**८९ चित्रघण्टा गणपतिः**

नागास्यं नवरत्नभूषणयुतं श्वेताम्बरालङ्कृतं

शुण्डयां कमलं च पुस्तकगुणौ घण्टाङ्कुशौ बाहुभिः |
बिभ्राणं शशिशेखरं त्रिनयनं शीताम्शुशुभ्रप्रभं
ध्याये नादसरस्वती युतमहं श्रीचित्रघण्टाभिधम् ||

**९० चण्डोद्दण्ड गणपतिः**

क्रूरास्यं भीमकायं शरभवरखगारूढमिन्द्रोपलाभं
वेतालं पानपात्रं परशुसृणिगुणान् खड्गखेटे त्रिशूलम् |
बिभ्राणं वक्रवक्त्रं गजवरवदनं चन्द्रचूडं त्रिनेत्रं
चण्डोद्दण्डाभिधानं मम हृदि कलये रक्तवस्त्राङ्गरागम् ||

**९१ प्रचण्ड गणपतिः**

चापं बाणगुणासिखेटपरशून् पद्माङ्कुशौ बाहुभिः
बिभ्राणं शशिशेखरं त्रिनयनं रक्ताम्बरं तुन्दिलम् |
देदीप्यन्नवरत्नगुप्तरदनद्वन्द्वप्रभाशोभितं
सिन्दूरारुणभं प्रचण्डगणपं स्तम्भेरमास्यं भजे ||

**९२ कूटदन्त गणपतिः**

अङ्कुशं पाशकं मोदकं पुष्करे
बिभ्रतं हीनदन्तद्वयं नागकः |
तं वराभीतिसंशोभिदन्तद्वयं
कूटदन्ताभिधं स्वर्णभं चिन्तये ||

**९३ शोणभद्र गणपतिः**

शङ्खपद्मनिधिज्वलन्निजपार्श्वकं गजमस्तकं

बिभ्रतं गुणमङ्कुशं परशुं करैः कमलं तथा |
शोणभद्रसमप्रभं पृथुरत्नकुम्भसुपुष्करं
शोणभद्रशिलोद्भवं भज देहळीभवविघनपम् ||

**९४ गुणेश गणपतिः**

राजन्मोदकसव्यहस्यसुमहाशुण्डं गदां तत्र च
तिष्ठन्तं च चतुर्भुजं वररदं पाशाङ्कुशौ बिभ्रतम् |
सिन्दूरारुणविग्रहं गजमुखं रक्ताम्बरं तुन्दिलं
तं चैकोऽभयदं नमामि गणपं श्रीभुक्तिमुक्त्यान्वितम् ||

**९५ रक्तगणपतिः**

रक्ताभं शूलचक्रे परशुसरसिजे व्रीहिपाशेक्षुचापं
शुण्डायां रत्नकुम्भं दधतमथगदामङ्कुशं चोत्पलं च |
रक्तास्यं सिंहवाहं सहितमभिमुखं सुन्दरी भारतीभ्यां
ध्याये मुक्ताविभूषं मृगमदतिलकं चन्द्रचूडं त्रिनेत्रम् ||

**९६ प्रवालगणपतिः**

इभाननं शशाङ्कशेखरं जपारुणम्बरं
सुदीप्तरत्नभूषणं विभिन्नदन्तमीश्वरम् |
प्रवालविघननायकं च सर्वहृद्यबोधिनी-
विनष्टवस्तुदायिनी युतं दशायुधं भजे ||

**९७ धरणीधर गणपतिः**

दिग्बाहुं शशिशेखरं त्रिनयनं रक्ताम्बरं तुन्दिलं

दीप्तं मौक्तिकहाररत्नमकुटैर्भग्नैकदन्तं प्रभुम् ।
आधाराख्यसरस्वती सहितया चाधारलक्ष्म्या युतं
रक्ताभं धरणीधरं हरिरथं नागाननं चिन्तये ॥

**९८ वरदगणपतिः**

बीजापूरविषाणदण्डकमलान् चापोत्पले सद्भुजां
पाशं चक्रकरत्नपूर्णकलशं पद्मं करैर्बिभ्रतम् ।
रक्तं सिंहरथं गजेन्द्रवदनं पीताम्बरं तुन्दिलं
ध्याये श्रीवरदाभिधं वरदया वाण्या च लक्ष्म्या युतम् ॥

**९९ द्वारगणपतिः**

जपापुष्पभासं गुणं जीवरत्नं
रदं मोदकाख्यं सुधापूर्णकुम्भम् ।
दधानं करैर्द्वारिलक्ष्मीसमेतं
गजास्यं त्रिनेत्रं भजे द्वारसंज्ञम् ॥

**१०० भूमिगणपतिः**

अन्धःपूर्णसुवर्णपात्ररदने शाल्यग्रसद्दाडिमे
बिभ्राणं स्मरकोटिसुन्दरतनुं नागाननं तुन्दिलम् ।
शुण्डायां नवरत्नकुम्भसहितं पीताम्बरालङ्कृतं
ध्याये भूमिगणाधिपं शशिधरं श्रीह्यन्नलक्ष्मीयुतम् ॥

**१०१ मुक्तागणपतिः**

मुक्तामालाविभूषं नवमणिखचितैर्भूषणैर्भूषिताङ्गं

हस्ते पीयूषकुम्भं दधतमभिमुखं नीलवर्णं त्रिनेत्रम् |
मुक्ताशक्तिं सरोजं गुणनिजरदनौ धारयन्तं कराब्जैः
मुक्तालक्ष्मीसमेतं मणिमयमकुटं नौमि मुक्तागणेशम् ||

**१०२ दुर्मुख गणपतिः**

भूमिपातित शम्भुपृष्ठग सव्यजानुमिभाननं
शम्भुशीर्षगशूलशोभिभुजद्वयं गुणमङ्कुशम् |
चित्तवृत्तिमयीयुतामथ चित्तहर्षविषाददां
बिभ्रतं निजपार्श्वयोर्भज दुर्मुखं च चतुर्भुजम् ||

**१०३ चन्दनगणपतिः**

कस्तूरीमृगवाहनं गजमुखं सद्रक्तगन्धाकृतिं
कल्हारोत्पलपङ्कजेक्षुधनुरप्यारक्तमालां गले |
शुण्डायां च दधानमिन्दुमकुटं नेत्रत्रयं सुन्दरं
ध्याये चन्दनसंज्ञकं तिलवाणी गन्धलक्ष्मीयुतम् ||

**१०४ सुमङ्गलगणपतिः**

इक्षूद्भूतशरासनं निजकरैः पुष्पेषुपाशाङ्कुशान्
बिभ्राणं च सुमङ्गलीप्रियसुतं नागाननं सुन्दरम् |
रक्तं चन्द्रकलाधरं त्रिनयनं क्षेमङ्करी मङ्गला
संयुक्तं कलये सुमङ्गलगणाधीशं सदा चेतसि ||

**१०५ मित्रगणपतिः**

तप्तस्वर्णसमानकान्तिरुचिरं पीताम्बरं तुन्दिलं

बिभ्राणं पृथुमोदकं वरकरे दन्तं च पद्मद्वयम् |
प्रज्ञाकान्तिसमन्वितं मणिगणैर्देदीप्यमानप्रभं
मित्राख्यं गणनायकं गजमुखं भग्नैकदन्तं भजे ||

**१०६ कृष्णगणपतिः**

शङ्खं चक्रविषाणमोदकमपि स्वीयैः करैर्बिभ्रतं
कालाम्भोदनिभं सुकौस्तुभयुतं पीताम्बरं तुन्दिलम् |
राधाकृष्णवरप्रदं त्रिनयनं विद्याविभूतीयुतं
नागास्यं शशिशेखरं गणपतिं कृष्णाभिधं भावये ||

**१०७ कूष्माण्डगणपतिः**

नागास्यं वृषवाहनं शशिधरं कूष्माण्डतुल्यप्रभं
नानाभूषणशोभिताङ्गरुचिरं कूष्माण्डतुल्यप्रभम् |
बिभ्राणं त्रिशिखं कपालडमरू पाशं भुजैस्तुन्दिलं
ध्याये श्रीगणनायकं त्रिनयनं कूष्माण्डमुण्डाभिधम् ||

**१०८ भीमचण्डी गणपतिः**

कन्दर्पानिन्तकान्तं पृथुतरजठरं पीतवस्त्रोत्तरीयं
वीणाचक्राक्षमाला त्रिशिखशुकधनुः पुस्तकेषून् दधानम् |
अष्टाभिर्बाहुपद्मैः शशधरमकुटं कीरवाहं त्रिनेत्रं
ध्याये वेतण्डतुण्डं मरकतमणिभं भीमचण्डीगणेशम् ||

**१०९ मार्गसहाय गणपतिः**

सहस्रारदन्तौ रुजां बीजपूरं

दधानं बृहन्मोदकं पुष्करे च ।
गजारूढमाद्यं घनश्यामवर्णं
भजेऽहं च मार्गेशसंज्ञं गणेशम् ॥

**११० कुक्षिगणपतिः**

जपापुष्पभासं स्वपाशाङ्कुशाढ्यं
वराभीतिहस्तं रदं चाभये तु ।
दधानं सरंध्रोदरं पीनकुक्षिं
भजे कुक्षिसंज्ञं गणेशं गजास्यम् ॥

**१११ भक्षप्रिय वृद्धगणपतिः**

सन्नारिकेलकदळिगुडपायसं च
चूतं दधानमनिशं शशिशुभ्रगात्रम् ।
नागाननं शशिधरं नयनत्रयाढ्यं
वृद्धाभिधं गणपतिं भज भक्षसंज्ञम् ॥

**११२ शूलटङ्क गणपतिः**

श्यामवर्णकायमिन्दुशेखरं चतुर्भुजं
शूलटङ्कपाशदन्तधारिणं त्रिलोचनम् ।
रत्नगुप्तकङ्कणं किरीटहारशोभितं
शूलटङ्कनामकं गणधिपं सदा भजे ॥

**११३ नृसिंहगणपतिः**

जपापुष्परक्तं सहस्रारशूले

दधानं च पाशाङ्कुशौ बाहुभिः स्वैः ।
प्रवीरासनस्थं त्रिनेत्रं सचन्द्रं
भजे तीक्ष्णदंष्ट्राननं सिंहवक्त्रम् ॥

**११४ ब्रह्मगणपतिः**

पद्मं दण्डकमण्डलू च परशुं पाशाक्षमालाङ्कुशान्
बिभ्राणं निजपुस्तकं वसुकरैः स्वर्णप्रभं तुन्दिलम् ।
हस्तीन्द्रास्यचतुष्टयेन सहितं पीताम्बरालङ्कृतं
ध्याये श्रीचतुराननाभिधमहं शक्तित्रयेनान्वितम् ॥

**११५ गणक गणपतिः**

स्फटिकधवलगात्रं पुस्तकं चाक्षमालां
कमलवरदहस्तं ज्ञानमुद्रां दधानम् ।
जननतिमिरसूर्यं चारुचन्द्रावतंसं
विदितसकलतत्त्वं हंसरूपं नमामि ॥

**११६ कलिप्रिय गणपतिः**

वाजिवाहनशोभितं वरकञ्चुकद्वयभासुरं
वृत्तभासुरपीवरालकवेष्टनान्वितमस्तकम् ।
रश्मितोत्रकरद्वयं मनुजाननं स्मरसुन्दरं
श्वेतवर्णकलेवरं भज तं कलिप्रियवल्लभम् ॥

**११७ कालानलप्रशमन गणपतिः**

ब्रह्मेन्द्ररुद्रमुखैदेवैर्वृतं भुजगराजोदरं मुनिगणैः

दूर्वार्चनेन परितुष्टं वराभयदहस्तं सरोजमभये |
आलिङ्ग्यन्तमतिपार्श्वस्थिते अमृतवाणीरमे शशिधरं
श्वेतवर्णं नरवक्त्रं स्मरामि हृदि कालानलप्रशमनम् ||

**११८ मन्त्रगणपतिः**

नागास्यं शशिशेखरं त्रिनयनं मालां सुरक्तां गले
शुण्डायां पृथुमोदकं वररदे पाशाङ्कुशौ बिभ्रतम् |
रक्ताभं हृदि मन्त्रसंज्ञगणपं भग्नैकदन्तं प्रभुं
संयुक्तं भज मन्त्रसिद्धियुतया श्रीमन्त्रविद्याख्यया ||

**११९ दूर्वागणपतिः**

मालादन्ताब्जयुक्तं परशुयुतकरं वेदबाहुं त्रिनेत्रं
दूर्वभक्त्या च तुष्टं मणिमथ मकुटं रत्नगन्धानुलिप्तम् |
रक्ताभं मोक्षलक्ष्म्या सहितमभिमुखं ज्ञानविद्याख्यया च
ध्याये दूर्वागणेशं शशधरमकुटं तुन्दिलं तं त्रिनेत्रम् ||

**१२० फालचन्द्र गणपतिः**

सिन्दूरारुणविग्रहं सुकुमुदं सञ्जीविनीं दाडिमं
दन्तं बाहुभिरादधानमनिशं पीयूषकुम्भं करे |
नागास्यं शशिशेखरं त्रिनयनं रक्ताम्बराढ्यं मृत-
सञ्जीविन्यामृतेश्वरीयुतमहं तं फालचन्द्रं भजे ||

**१२१ योगनिद्रा गणपतिः**

बन्धूकारुणविग्रहं द्विरदनं पाशाङ्कुशौ मालिकां

बिभ्राणं निजबाहुभिर्गजमुखं रक्ताम्बरं सुन्दरम् |
निद्रायोगयुतं च योगगणपं योकैगलभ्यं भजे
देवं बुद्धिसरस्वती सहितया श्रीयोगसिद्ध्या युतम् ||

**१२२ संख्यगणपतिः**

मुक्तावर्णं गजवरमुखं चन्द्रचूडं त्रिनेत्रं
मोक्षाधीशं वरमभयदं ह्यङ्कुशं पाशवर्यम् |
बुद्ध्या सिद्ध्या च सहितं ज्ञानमोक्षभिधाभ्यां
ध्याये नित्यं गजमुखयुतं संख्यसंस्थं गणेशम् ||

## dvātriṃśanmūrtayaḥ

bālastaruṇabhaktau ca vīraḥ
śaktirdvijastathā |
siddha ucchiṣṭa vighneśau kṣipro
herambanāmakaḥ ||
lakṣmīgaṇapatiścaiva mahāvighneśvarastathā
|
vijayaḥ kalpanṛttaścāpyūrdhva vighneśa
ucyate ||
ekākṣaro varaścaiva tryakṣaraḥ
kṣipradāyakaḥ |
haridrākhyaścaikadantaḥ
sṛṣṭiruddaṇḍanāmakaḥ ||
ṛṇamocanako ḍhuṇḍhirdvimukhastrimukhastathā
|

siṃho yogaśca durgā ca devaḥ saṅkaṭahārakaḥ ||

**1 bālagaṇapatiḥ**

karastha kadalīcūtapanasekṣukamodakam |
bālasūryanibhaṃ vande devaṃ bālagaṇādhipam ||

**2 taruṇagaṇapatiḥ**

pāśāṅkuśāpūpakapitthajambū-
svadantaśālīkṣumapi svahastaiḥ |
dhatte sadā yastaruṇāruṇābhaḥ
pāyāt sa yuṣmāṃstaruṇo gaṇeśaḥ ||

**3 bhaktagaṇapatiḥ**

nārikeḻāmrakadalīguḍapāyasadhāriṇam |
śaraccandrābhavapuṣaṃ bhaje bhaktagaṇādhipam ||

**4 vīragaṇapatiḥ**

vetālaśaktiśarakārmukacakrakhaḍga-
khaṭvāṅgamudgaragadāṅkuśanāgapāśān |
śūlaṃ ca kuntaparaśuṃ dhvajamudvahantaṃ
vīraṃ gaṇeśamaruṇaṃ satataṃ smarāmi ||

**5 śaktigaṇapatiḥ**

āliṅgya devīṃ haritāṅgayaṣṭiṃ
parasparāśliṣṭakaṭipradeśam |
sandhyāruṇaṃ pāśasṛṇī vahantaṃ

bhayāpahaṃ śaktigaṇeśamīḍe ||

6 **dvijagaṇapatiḥ**
yaṃ pustakākṣaguṇadaṇḍakamaṇḍalu śrī-
vidyotamānakarabhūṣaṇaminduvarṇam |
stamberamānanacatuṣṭayaśobhamānaṃ
tvāṃ yaḥ smaret dvijagaṇādhipate sa dhanyaḥ
||

**7 siddhagaṇapatiḥ**
pakkvacūtaphalapuṣpamañjarī-
rikṣudaṇḍatilamodakaiḥ saha |
udvahan paraśumastu te namaḥ
śrīsamṛddhiyuta hemapiṅgala ||

**8 ucchiṣṭagaṇapatiḥ**
nīlābjadāḍimīvīṇāśāliguñjākṣasūtrakam |
dadhaducchiṣṭanāmāyaṃ gaṇeśaḥ pātu mecakaḥ
||

**9 vighnagaṇapatiḥ**
śaṅkhekṣucāpakusumeṣukuṭhārapāśa-
cakrasvadantasṛṇimañjarikāśarādyaiḥ |
pāṇiśritaiḥ parisamīhitabhūṣaṇaśrī-
vighneśvaro vijayate tapanīyagauraḥ ||

**10 kṣipragaṇapatiḥ**
dantakalpalatāpāśaratnakumbhāṅkuśojjvalam |

bandhūkakamanīyābhaṃ dhyāyet
kṣipragaṇādhipam ||

**11 herambagaṇapatiḥ**
abhayavaradahastaḥ pāśadantākṣamālā-
sṛṇiparaśu dadhāno mudgaraṃ modakaṃ ca |
phalamadhigatasiṃhaḥ pañcamātaṅgavaktro
gaṇapatiratigauraḥ pātu herambanāmā ||

**12 lakṣmīgaṇapatiḥ**
bibhrāṇaḥ
śukabījapūrakamilanmāṇikyakumbhāṅkuśān
pāśaṃ kalpalatāṃ ca
khaḍgavilasajjyotissudhānirjharaḥ |
śyāmenāttasaroruheṇa sahitaṃ devīdvayaṃ
cāntike
gaurāṅgo varadānahastasahito
lakṣmīgaṇeśo.avatāt ||

**13**
**mahāgaṇapatiḥhastīndrānanaminducūḍamaruṇacc**
**hāyaṃ trinetraṃ rasā-**
dāśliṣṭaṃ priyayā sapadmakarayā
svāṅkasthayā santatam |
bījāpūragadekṣukārmukalasaccakrābjapāśotpal
a-
vrīhyagrasvaviṣāṇaratnakalaśān
hastairvahantaṃ bhaje ||

**14 vijayagaṇapatiḥ**

pāśāṅkuśasvadantāmraphalavānākhuvāhanaḥ |
vighnaṃ nihantu naḥ sarvaṃ raktavarṇo
vināyakaḥ ||

**15 nṛttagaṇapatiḥ**

pāśāṅkuśāpūpakuṭhāradanta-
cañcatkarāklṛptavarāṅgulīkam |
pītaprabhaṃ kalpataroradhasthaṃ
bhajāmi nṛttopapadaṃ gaṇeśam ||

**16 ūrdhvagaṇapatiḥ**

kalhāraśālikamalekṣukacāpabāṇa-
dantaprarohakagadī kanakojjvalāṅgaḥ |
āliṅganodyatakaro haritāṅgayaṣṭyā
devyā karotu śubhamūrdhvagaṇādhipo me ||

**17 ekākṣara gaṇapatiḥ**

rakto
raktāṅgarāgāṅkuśakusumayutastundilaścandram
auliḥ
netrairyuktastribhirvāmanakaracaraṇo
bījapūraṃ dadhānaḥ |
hastāgrāklṛpta pāśāṅkuśaradavarado
nāgavaktro.ahibhūṣo
devaḥ padmāsanastho bhavatu sukhakaro
bhūtaye vighnarājaḥ ||

**18 varagaṇapatiḥ**

sindūrābhamibhānanaṃ trinayanaṃ haste ca pāśāṅkuśau
bibhrāṇaṃ madhumatkapālamaniśaṃ sādhvindumauliṃ bhaje |
puṣṭyāśliṣṭatanuṃ dhvajāgrakarayā padmollasaddhastayā
tadyonyāhita pāṇimāttavasumatpātrollasatpuṣkaram ||

**19 tryakṣara gaṇapatiḥ**

gajendravadanaṃ sākṣāccalatkarṇasucāmaraṃ
hemavarṇaṃ caturbāhuṃ pāśāṅkuśadharaṃ varam |
svadantaṃ dakṣiṇe haste savye tvāmraphalaṃ tathā
puṣkarairmodakaṃ caiva dhārayantamanusmaret ||

**20 kṣipraprasāda gaṇapatiḥ**

dhṛtapāśāṅkuśakalpalatā svaradaśca bījapūrayutaḥ
śaśiśakalakalitamaulistrilocano.aruṇaśca gajavadanaḥ |
bhāsurabhūṣaṇadīpto bṛhadudaraḥ padmaviṣṭarollasitaḥ
vighnapayodharapavanaḥ karadhṛtakamalaḥ sadāstu me bhūtyai ||

**21 haridrāgaṇapatiḥ**

haridrābhaṃ caturbāhuṃ karīndravadanaṃ prabhum |
pāśāṅkuśadharaṃ devaṃ modakaṃ dantameva ca |
bhaktābhayapradātāraṃ vande vighnavināśanam ||

**22 ekadanta gaṇapatiḥ**

lambodaraṃ śyāmatanuṃ gaṇeśaṃ
kuṭhāramakṣasrajamūrdhvagātram |
salaḍḍukaṃ dantamadhaḥkarābhyāṃ
vāmetarābhyāṃ ca dadhānamīḍe ||

**23 sṛṣṭigaṇapatiḥ**

pāśāṅkuśasvadantāmraphalavānākhuvāhanaḥ |
vighnaṃ nihantu naḥ śoṇaḥ sṛṣṭidakṣo vināyakaḥ ||

**24 uddaṇḍagaṇapatiḥ**

kalhārāmbujabījapūrakagadādantekṣucāpaṃ sumaṃ
bibhrāṇo maṇikumbhaśālikalaśau pāśaṃ sṛṇiṃ cābjakam |
gaurāṅgyā rucirāravindakarayā devyā samāliṅgitaḥ
śoṇāṅgaḥ śubhamātanotu bhajatāmuddaṇḍavighneśvaraḥ ||

**25 ṛṇamocakagaṇapatiḥ**
pāśaṅkuśau dantajambu dadhānaḥ
sphaṭikaprabhaḥ |
raktāṃśuko gaṇapatirmude syādṛṇamocakaḥ ||

**26 ḍhuṇḍhigaṇapatiḥ**
akṣamālāṃ kuṭhāraṃ ca ratnapātraṃ
svadantakam |
dhatte karairvighnarājo ḍhuṇḍhināmā
mude.astu naḥ ||

**27 dvimukha gaṇapatiḥ**
svadantapāśāṅkuśaratnapātraṃ
karairdadhāno harinīlagātraḥ |
raktāṃśuko ratnakirīṭamālī
bhūtyai sadā me dvimukho gaṇeśaḥ ||

**28 trimukha gaṇapatiḥ**
śrīmattīkṣṇaśikhāṅkuśākṣavaradān dakṣe
dadhānaḥ karaiḥ
pāśaṃ cāmṛtapūrṇakumbhamabhayaṃ vāme
dadhāno mudā |
pīṭhe
svarṇamayāravindavilasatsatkarṇikābhāsure
svāsīnastrimukhaḥ palāśaruciro nāgānanaḥ
pātu naḥ ||

**29 siṃhagaṇapatiḥ**

vīṇāṃ kalpalatāmariṃ ca varadaṃ dakṣe vidhatte karaiḥ
vāme tāmarasaṃ ca ratnakalaśaṃ sanmañjarīṃ cābhayam |
śuṇḍādaṇḍalasanmṛgendravadanaḥ śaṅkhendugauraḥ śubho
dīvyadratnanibhāṃśuko gaṇapatiḥ pāyādapāyāt sa naḥ ||

**30 yogagaṇapatiḥ**

yogārūḍho yogapaṭṭābhirāmo
bālārkābhaścandranīlāṃśukāḍhyaḥ |
pāśekṣvakṣān yogadaṇḍaṃ dadhāno
pāyānnityaṃ yogavighneśvaro naḥ ||

**31 durgāgaṇapatiḥ**

taptakāñcanasaṅkāścāṣṭahasto mahattanuḥ
dīptāṅkuśaṃ śaraṃ cākṣaṃ dantaṃ dakṣe vahan karaiḥ |
vāme pāśaṃ kārmukaṃ ca latāṃ jambu dadhatkaraiḥ
raktāṃśukaḥ sadā bhūyāddurgāgaṇapatirmude ||

**32 saṅkaṣṭaharagaṇapatiḥ**

bālārkāruṇakāntirvāme bālāṃ vahannaṅke
lasadindīvarahastāṃ gaurāṅgīṃ ratnaśobhāḍhyām |

dakṣe.aṅkuśavaradānaṃ vāme pāśaṃ ca pāyasaṃ pātraṃ
nīlāṃśukalasamānaḥ pīṭhe padmāruṇe tiṣṭhan ||

**33 vyomagaṇapatiḥ**

kalhārekṣuśarāsanaṃ ca paraśuṃ puṣpeṣupadmau karaiḥ
bibhrāṇaṃ śaśiśekharaṃ jagamukhaṃ cenduprabhaṃ tundilam |
nānāratnavicitrabhūṣaṇayutaṃ śvetāmbarālaṅkṛtaṃ
dhyāyedvyomasarasvatīyutamahaṃ taṃ vyomavighneśvaram ||

**34 śāradāgaṇapatiḥ**

padmavrīhyabhitomaraṃ guṇavaraṃ paraśuṃ ca pāśāṅkuśau
cūtaṃ daṇḍasudāḍimīkanakayukkumbhaṃ dadhānaṃ karaiḥ |
śliṣṭaṃ śāradayā sapadmakarayā nīhārakāntyā sitaṃ
nāgāsyaṃ smitavaktramindumukuṭaṃ taṃ śāradeśaṃ bhaje ||

**35 yakṣagaṇapatiḥ**

svarṇavarṇakaḻevaraṃ gajamastakaṃ śaśiśekharaṃ

bibhratаṃ guṇamaṅkuśaṃ varadābhaye nijabāhubhiḥ |
savyasagdhigayakṣiṇīmukhapadmabhṛṅganijekṣaṇaṃ
yakṣasaṃjñagaṇeśvaraṃ nayanatrayaṃ hṛdi cintaye ||

**36 modagaṇapatiḥ**

karairaṅkuśaṃ dantapāśau dadhānaṃ
varākhyaṃ bṛhanmodakaṃ puṣkare ca |
gajāsyaṃ sadānandavāṇīsametaṃ
sudhāṃśuprabhaṃ modasaṃjñaṃ bhaje.aham ||

**37 pramodagaṇapatiḥ**

dhyāyet śāradaśītabhānusadṛśaṃ vāmāṅkagā sundarī-
vakṣojārpitapuṣkaraṃ śaśidharaṃ śvetāmbaraṃ sundaram |
bibhrāṇaṃ yugabāhubhiśca kamalaṃ pāśāṅkuśau modakaṃ
nāgāsyaṃ satataṃ pramodagaṇapaṃ svānandalakṣmīyutam ||

**38 gaurīgarbhodbhava gaṇapatiḥ**

sandhyāmeghasubandhujīvakanibhaṃ pāśāṅkuśau paṅkajaṃ
bibhrāṇaṃ paraśuṃ karaiḥ śaśidharaṃ nāgāsyamākhudhvajam |

gaurīgarbhasamudbhavaṃ trinayanaṃ
dantadvayenānvitaṃ
dhyāye.ahaṃ tilakojjvalaṃ gaṇapatiṃ
sindūradaityāntakam ||

**39 śvetagaṇapatiḥ**

nāgāsyaṃ śaśiśekharaṃ trinayanaṃ
śvetāmbarālaṅkṛtaṃ
pīyūṣaṃ ca karirdadhānamaniśaṃ padmāṅkuśau
mudgaram |
viṣṇvādyairapi pūjitaṃ suravaraiḥ
pīyūśamūrtiṃ prabhuṃ
śvetākhyaṃ gaṇanāyakaṃ svakamalāvāṇīsametaṃ
bhaje ||

**40 jyeṣṭharājagaṇapatiḥ**

digbāhuṃ sundarāṅgaṃ
hariśivabhuvanāsūryasaṃsevyamānaṃ
koṭyaṇḍāyātakeśairnibiḍanijasabhaṃ
vīkṣyamāṇe bhrubhaṅgaiḥ |
dhyāye siṃhāsanasthaṃ dhavalataratanuṃ
candracūḍaṃ trinetraṃ
nāgāsyaṃ jyeṣṭharājaṃ mama hṛdi sahitaṃ
śrīvirājñyā svarājñyā ||

**41 trimūrtigaṇapatiḥ**

śaṅkhaṃ śūlakamaṇḍaluṃ ca ḍamaruṃ
cakrākṣamāle karaiḥ

bibhrāṇaṃ śaśiśekharaṃ trinayanaṃ śeṣāsanaṃ vāmataḥ |
madhye dakṣiṇataśca keśavadanaṃ śubhrābhadehaṃ prabhuṃ
hemaśyāmahaḻarkṣavaktramaniśaṃ dhyāye trivaktrābhidam ||

**42 modakapriyagaṇapatiḥ**

śālīmudgasuśarkarādadhighṛtānyannāni sanmodakaṃ
laḍḍūkāmrasunārikelakadalīsusvādukān puṣkare |
kastūrītilakaṃ sukhāsanagataṃ raktāṅgarāgāmbaraṃ
sindūrāruṇavigrahaṃ gajamukhaṃ pītottarīyaṃ prabhum |
nānāvarṇavicitraratnakusumasrakṣobhitaṃ sundaraṃ
devaṃ cetasi modakapriyamahaṃ netratrayaṃ cintaye ||

**43 dhūmaketu gaṇapatiḥ**

raktābhaṃ paraśuṃ ca cakrakamale śaṅkhaṃ karairbibhrataṃ
svīyāsyādanalaṃ vamantamaniśaṃ dhūmadhvajaṃ bālakam |
dhūmasyaiva vadhāya mādhavasutatvenāvatīrṇaṃ prabhuṃ

nāgāsyaṃ dviradānvitaṃ śaśidharaṃ taṃ
dhūmaketuṃ bhaje ||

**44 stūladantagaṇapatiḥ**

nīlābhaṃ candracūḍaṃ smaraśatasadṛśaṃ
hastivaktraṃ trinetraṃ
śuṇḍāyāṃ puṣpahāraṃ paraśusarasije cāru
śaṅkhaṃ ca cakram |
bibhrāṇaṃ bāhupadmaiḥ navamaṇikhacitaiḥ
sthūladantadvayāḍhyaṃ
vāgbhūtyā viśvabhūtyā sahitamajasutaṃ
sthūladantaṃ bhaje.aham ||

**45 śvetārkagaṇapatiḥ**

bījāpūraguṇāṅkuśau svaradanaṃ
hastāmbujairbibhratam
bhāsvaddhemayutāgraśubhravasanaṃ
śvetārkamūlodbhavam |
devaṃ mūṣikavāhanaṃ gajamukhaṃ
kandarpakoṭiprabhaṃ
śvetābhaṃ śaśiśekharaṃ trinayanaṃ
śvetārkadevaṃ bhaje ||

**46 vighnarāja gaṇapatiḥ**

śaṅkhaṃ cakrāṅkuśau svaiḥ
kusumaśaraguṇesvekṣucāpaṃ kuṭhāraṃ
śālīguccham karābjairdadhatamatha sadā
mūṣakārūḍhamīśam |

svarṇābhaṃ candracūḍaṃ trinayanasahitaṃ siddhyalakṣmyā ca vāgī-
śvaryā yuktaṃ gajavaravadanaṃ vighnarājaṃ bhaje.aham ||

**47 agnigaṇapatiḥ**

viṣāṇaṃ ca sanmodakaṃ sarpipātraṃ
suśaktiṃ dadhānaṃ lasatsvarṇavarṇam |
dharantaṃ karaiḥ ratnakumbhaṃ gajāsyaṃ
bhaje rūpalakṣmīyutaṃ vahnisaṃjñam ||

**48 sahasranetra kuṇitākṣa gaṇapatiḥ**

vinyastavāmabhujasaṃśobhijānusahitaṃ
vajratīkṣṇaparaśū jñānābhidhānamudrāṃ
dadhānamatha pītāmbaraṃ śaśidharam |
bhinnendranīlanibhavarṇaṃ
sahasrakuṇitākṣāṅgakaṃ gajamukhaṃ siṃhāsane
vidhṛta vīrāsanaṃ ca kuṇitābhidhaṃ hṛdi bhaje ||

**49 mokṣagaṇapatiḥ**

muktāvarṇaṃ gajavaramukhaṃ candracūḍaṃ trinetraṃ
mokṣādhīśaṃ varamabhayadaṃ hyaṅkuśaṃ pāśavaryam |
siddhyā buddhyā ca sahitamajaṃ mokṣaśabdānvitābhyāṃ
dhyāye nityaṃ radayugayutaṃ cāvimuktaṃ gaṇeśam ||

**50 oṅkāragaṇapatiḥ**
sindūrāruṇavigrahaṃ svavaradaṃ dantaṃ ca pāśāṅkuśau
bibhrāṇaṃ varadāḍimaṃ tamabhaye sanmodakaṃ puṣkare |
oṅkārākhya sarasvatī sahitayā hyoṅkāralakṣmīyutaṃ
oṅkārākhyagaṇādhipaṃ gajamukhaṃ hyoṅkārapīṭhe sthitam ||

**51 vikaṭagaṇapatiḥ**
mālāṃ modakapaṅkajasvaparaśūn hastāmbujaiḥ bibhrataṃ
muktādāmalasadgaḻaṃ śaśidharaṃ netratrayaṃ tundilam |
ratnaṃ nirvṛtiśāntiyuktamibhakaṃ cintāmaṇībhūṣitaṃ
dhyāye śrīvikaṭābhidhaṃ gaṇapatiṃ divyāmbarālaṅkṛtam ||

**52 kapilagaṇapatiḥ**
mālāṃ modakapaṅkajasvaparaśūn hastairdadhānaṃ prabhuṃ
svarṇābhaṃ vadane sudhāṃśumukuṭaṃ kālāmbudābhaṃ tanau |
nāgāsyaṃ bhaja yogaśabdayutayā siddhyā tathā vidyayā

saṃyuktaṃ kapilābhidhaṃ gaṇapatiṃ
cintāmaṇībhūṣitam ||

**53 ratnagarbha gaṇapatiḥ**

dhyāye śrīnavaratnadehamibhakaṃ
cintāmaṇībhūṣaṇaṃ
bibhrāṇaṃ navaratnakaṃ
navakaraiścandrāvatamsaṃ prabhum |
nāgāsyaṃ navaśaktibhiśca nidhibhiḥ lakṣmyā
tathā vidyayā
saṃyuktaṃ hṛdi ratnagarbhagaṇapaṃ
netratrayaṃ tundilam ||

**54 kālagaṇapatiḥ**

japāpuṣpabhāsaṃ svapāśāṅkuśāḍhyaṃ
varābhītihastaṃ radaṃ cābhaye tu |
dadhānaṃ ca kālaṃ gajendrānanaṃ taṃ
bhaje vighnanāthaṃ niśānāthacūḍam ||

**55 sumukha gaṇapatiḥ**

bījāpūraviṣāṇadaṇḍakamalān cāpotpale
sadrujāṃ
pāśaṃ cakrasarojaratnakalaśān
hastairdadhānaṃ prabhum |
nāgāsyaṃ ca susiddhibuddhisahitaṃ
bandhūkapuṣpaprabhaṃ
dhyāye śrīsumukhaṃ sadāpi bhuvaneśānyā
manobhīṣṭadam ||

**56 ekadantagaṇapatiḥ**

raktaṃ raktāmbarāḍhyaṃ trinayanasahitaṃ
candracūḍaṃ karābjaiḥ
pāśaṃ caivāṅkuśāḍhyaṃ varadamabhayake
dantakhaṇḍaṃ vahantam |
vidyāmāyābhidhābhyāṃ sahitamatha
mahāśabdayugbhyāṃ priyābhyāṃ
svārūḍhaṃ brahmarūpaṃ vidhimukhavaradaṃ
caikadantaṃ namāmi ||

**57 cintāmaṇigaṇapatiḥ**

nāgāsyaṃ svakaraiḥ sarojaparaśū mālāṃ
bṛhanmodakaṃ
nānāratnavicitritaṃ nijagaḻe
cintāmaṇībhūṣaṇam |
bibhrāṇaṃ hṛdi bandhujīvakanibhaṃ
cintāmaṇīnāyakaṃ
cintāpūrvasarasvatīyuta mahālakṣmīsametaṃ
bhaje ||

**58 vakratuṇḍa gaṇapatiḥ**

bandhūkāruṇamminducūḍamuḍuyuk
vyomābhasavyānakaṃ
raktādhovasanaṃ gajendravadanaṃ khaḍgaṃ
dhanuḥ kheṭakam |
śaktiṃ bāhubhirādadhānamaniśaṃ taṃ
vakratuṇḍābhidhaṃ
keśānugrahakārakaṃ prakṛtividyābhyāṃ yutaṃ
bhāvaye ||

**59 santānagaṇapatiḥ**
bibhrāṇaṃ hyabhaye radaṃ ca varade
nīlotpalaṃ cāṅkuśaṃ
pāśaṃ candradharaṃ gajānanamajaṃ devīkuce
puṣkaram |
svarṇābhaṃ smarakoṭisundaratanuṃ
pītāmbarālaṅkṛtaṃ
santānākhya gaṇādhipaṃ hṛdi bhaje
santānalakṣmīyutam ||

**60 satyagaṇapatiḥ**
sindūrāruṇavigrahaṃ svaradanaṃ pāśāṅkuśau
mālikāṃ
bibhrāṇaṃ nijabāhubhirgajamukhaṃ
sarpodarābandhanam |
muktādāmayutaṃ ca satyagaṇapaṃ brahmātmajaṃ
bhāvaye
devaṃ satyasarasvatīsahitayā
śrīsatyalakṣmīyutam ||

**61 kalpakagaṇapatiḥ**
śūlaṃ cakradhanurgadāśca dadhataṃ
satkalpavallīyutaṃ
dantaṃ vrīhyasitotpalaṃ guṇavaraṃ padmaṃ
svadigbāhubhiḥ |
hastīndrananaminducūḍamaruṇacchāyaṃ
trinetrānvitaṃ

dhyāye kalpakamadya
kalpakamahāvāṇīramāsaṃyutam ||

**62 āśāpūraka gaṇapatiḥ**

āśāpūragaṇādhipaṃ gajamukhaṃ
bandhūkapuṣpaprabhaṃ
sindūrāruṇamastakaṃ śikhirathaṃ
sarpodarābandhanam |
āśāpūrasarasvatīsahitayā.aśāpūralakṣmyā
yutaṃ
muktādāmavibhūṣaṇaṃ daśabhujaṃ divyāmbaraṃ
cintaye ||

**63 ājñāgaṇapatiḥ**

jānunyastakaraṃ varekṣusahitaṃ
sajjñānamudrānvitaṃ
bibhrāṇaṃ sahakārapallavavaraṃ siṃhāsane
saṃsthitam |
sāmrājñyā kanakābhayā hṛdi mahārājñyā ca
saṃśobhitaṃ
candrābhaṃ gajavaktramindumakuṭaṃ
cājñāgaṇeśaṃ bhaje ||

**64 gaurīmalodbhava gaṇapatiḥ**

pāśaṃ modakamaṅkuśaṃ svaradanaṃ
dorbhirdadhānaṃ prabhuṃ
śuṇḍāyāṃ pṛthunārikelasahitaṃ
nīlotpalaśrīyutam |

pārśve saṃsthita tuṣṭipuṣṭisahitaṃ
nāgānanaṃ tundilaṃ
taṃ gaurīmalasambhavaṃ śaśidharaṃ
bhagnaikadantaṃ bhaje ||

**65 svarṇākarṣaṇa gaṇapatiḥ**
svarṇābhaṃ varadābhaye gajamukhaṃ
pāśāṅkuśau bibhrataṃ
gehe svarṇamaye sthitaṃ śaśidharaṃ
pītāmbaraṃ sundaram |
nityaṃ ṛddhisamṛddhiyuktamaniśaṃ
śaṅkhādibhiḥ sevitaṃ
svarṇākarṣaṇanāmakaṃ ca vasumatyādyāvṛtaṃ
cintaye ||

**66 ṣaṇmukha gaṇapatiḥ**
ṣaṇmātaṅgamukhaṃ sudhāṃśumakuṭaṃ pāśāṅkuśau
kukkuṭaṃ
śaktiṃ vajradhanū varābhayakaraṃ
śūlāsikheṭān gadām |
bibhrāṇaṃ navabandhujīvakanibhaṃ
netratrayaṃ tundilaṃ
dedīpyānmaṇihārabhūṣaṇarucaṃ
śrīṣaṇmukhākhyaṃ bhaje ||

**67 siddhigaṇapatiḥ**
martyāsyaṃ maṇipādukaṃ śaśidharaṃ
siddhāñjanaṃ bibhrataṃ

hastābjairvarayogadaṇḍabhasite gandhaṃ ca divyaprabham |
kaupīnaṃ kaṭisūtrakaṃ ca tilakaṃ netratrayaṃ sundaraṃ
siddhākhyaṃ bhaja sarvasiddhiyutayā śrīsarvabuddhyā yutam ||

**68 lambodara gaṇapatiḥ**

raktābhaṃ varadābhaye svaradanaṃ saddāḍimaṃ bibhrataṃ
śuṇḍāyāṃ pṛthu modakaṃ ca satataṃ pāśāṅkuśau bāhubhiḥ |
nāgāsyaṃ hṛdi vedamātṛsahitaṃ śrīkeśamātrāyutaṃ
koṭyaṇḍāyutapūrṇanaijajaṭharaṃ lambodaraṃ cintaye ||

**69 śūrpakarṇa gaṇapatiḥ**

cūtādīni daśāyudhāni ca karaiḥ svairdakṣiṇādyaiḥ kramāt
bibhrāṇaṃ dhavalaprabhaṃ maṇimaye siṃhāsane saṃsthitam |
medhādevimukhaṃ gaṇāṣṭakalasatpārśvadvayaṃ tundilaṃ
nāgāsyaṃ bhaja bhagnavāmaradanaṃ taṃ śūrpakarṇaṃ bhaje ||

**70 bījagaṇapatiḥ**

nāgāsyaṃ candracūḍaṃ trinayanasahitaṃ
ratnapīṭhe niṣaṇṇaṃ
raktaṃ pāśāṅkuśāḍhyaṃ hyabhayavaradake
dantasadbījapūre |
bibhrāṇaṃ bāhupadmaiḥ pṛthutarajaṭharaṃ
pītakauśeyavastraṃ
dhyāye śrībījasaṃjñaṃ mama hṛdi satataṃ
bījavāṇīramābhyām ||

**71 mahodara gaṇapatiḥ**
nāgāsyaṃ candracūḍaṃ sphaṭikamaṇinibhaṃ
jñānamudrākṣasūtraṃ
pāśaṃ tīkṣṇāṅkuśākhyaṃ
dadhatamathakarairāsane vīrasaṃjñe |
tiṣṭhaṃtaṃ jñānavidyāsahitamapi sadā
jñānasiddhyā sametaṃ
dhyāye śrībodhasaṃjñaṃ mahadudaradharaṃ
citsvarūpaṃ gaṇeśam ||

**72 rājagaṇapatiḥ**
aśvārūḍhaṃ trinetraṃ smaraśatasadṛśaṃ
dhārayantaṃ karābhyāṃ
bibhrāṇaṃ
ratnaguptairmaṇimayakaṭakairaṅgadaiḥ
ratnahāraiḥ |
bhāsvantaṃ svarṇavarṇaṃ navamaṇimakuṭaṃ
sundaraṃ rājavidyā-
lakṣmīyuktaṃ smitāsyaṃ mama hṛdi satataṃ
cintaye rājasaṃjñam ||

**73 mayūreśa gaṇapatiḥ**

hemābhaṃ radanaṃ varābhayakaraṃ pāśaṃ
dadhānaṃ prabhuṃ
svāṅkasthāpita siddhibuddhisahitaṃ
bhagnaikadantaṃ bhaje |
pañcānāṃ janakaṃ tathaiva jagatāṃ māyā
parāvaibhavāt
nāgāsyaṃ sakalārthadaṃ gaṇapatiṃ
śrīmanmayūreśvaram ||

**74 jñānagaṇapatiḥ**

nāgāsyaṃ candracūḍaṃ sphaṭikamaṇinibhaṃ
jñānamudrākṣasūtraṃ
pāśaṃ tīkṣṇāṅkuśākhyaṃ
dadhatamathakarairāsane vīrasaṃjñe
tiṣṭhantaṃ brahmavidyāsahitamapi sadā
jñānasiddhyā sametaṃ
dhyāye śrījñānasaṃjñaṃ trinayanasahitaṃ
dantayugmābhirāmam ||

**75 ballāḻa gaṇapatiḥ**

mālāṃ modakapaṅkajasvaparaśūn dantaṃ
dadhānaṃ karaiḥ
saṃyamyaikapadaṃ nipātya hi paraṃ
cādhassupīṭhe sthitam |
raktaṃ kāñcanamudrikāmahivaraṃ hastodare
bibhrataṃ

ballāḻeśa gaṇādhipaṃ hṛdi bhaje pītāmbaraṃ sundaram ||

**76 svānandeśa gaṇapatiḥ**

raktāmbhodhisthapotollasadaruṇasarojādhirūḍhaṃ trinetraṃ
pāśaṃ caivāṅkuśāḍhyaṃ paraśumabhayadaṃ bāhubhirdhārayantam |
svānandeśaṃ gajāsyaṃ pṛthutarajaṭharaṃ siddhibuddhīsametaṃ
raktaṃ candrārdhamauliṃ sakalabhayaharaṃ vighnarājaṃ namāmi ||

**77 mahotkaṭa gaṇapatiḥ**

daṇḍaṃ śūlakamaṇḍalū ca ḍamaruṃ pāśāṅkuśau paṅkajaṃ
bibhrāṇaṃ varadābhaye svaparaśuṃ pañcāsyavāhaṃ prabhum |
svarṇābhaṃ śaśiśekharaṃ trinayanaṃ kauśeyakaṃ bibhrataṃ
muktādāmamahotkaṭaṃ hṛdi bhaje śrīsiddhibuddhīyutam ||

**78 puṣṭigaṇapatiḥ**

muktāmālāvibhūṣaṃ navamaṇikhacitairbhūṣaṇairbhūṣitāṅgaṃ
haste pīyūṣakumbhaṃ dadhatamabhimukhaṃ raktavarṇaṃ trinetram |

puṣṭyā yuktaṃ sarojaṃ guṇanijaradanau
dhārayantaṃ karābjaiḥ
vighnādhīśaṃ gaṇeśaṃ maṇimayamakuṭaṃ naumi
viśvādhinātham ||

**79 mandāragaṇapatiḥ**

svarṇābhaṃ pītavastraṃ radayugasahitaṃ
lambakarṇaṃ trinetraṃ
pāśaṃ caivāṅkuśāḍhyaṃ varadamabhayadaṃ
bāhubhirdhārayantam |
sarvābhīṣṭapradātryā sahitamapi tathā
sarvasaṅkaṣṭahantryā
yuktaṃ mandāradevaṃ gajavaravadanaṃ
mūṣakārūḍhamīḍe ||

**80 navanītagaṇapatiḥ**

smerāsyaṃ navanītatulyavapuṣaṃ pāśaṃ svakaṃ
mudgaraṃ
śuṇḍāyāṃ pṛthumodakaṃ ca dadhataṃ
śvetāmbarālaṅkṛtam |
nāgāsyaṃ navanītanāmakamajaṃ
karpūrapūjāpriyaṃ
dhyāye śrīnavanītapūrvapadayā vāṇyā ca
lakṣmyā yutam ||

**81 lakṣagaṇapatiḥ**

nānācaṇḍāṃśutulyaṃ gajavaravadanaṃ
divyagandhānulepaṃ

pāśaṃ mālāṅkuśāḍhyaṃ nijavaraparaśuṃ dhārayantaṃ trinetram |
nānālaṅkāradīptaṃ śaśadharamakuṭaṃ lakṣapūrvābhidhābhyāṃ
siddhyā buddhyā sametaṃ sapadi śikhirathaṃ lakṣavighneśamīḍe ||

**82 gavyagaṇapatiḥ**

nāgāsyaṃ śyāmavarṇaṃ madhuradadhipayaḥpūrṇapātre karābjaiḥ
laḍḍūkaṃ kalpavallīṃ dadhatamatha mudā modakaṃ puṣkareṇa |
vāhatve kāmadhenuṃ dhavalataradhanuṃ dhārayantaṃ trinetraṃ
bāhyantaśśuddhiyuktaṃ mama hṛdi kalaye gavyasaṃjñaṃ gaṇeśam ||

**83 maṇikarṇī gaṇapatiḥ**

padmaṃ kalhārapuṣpaṃ nijakarakamalairutpalaṃ modakaṃ ca
haste mālāṃ dadhānaṃ navamaṇikhacitairbhūṣaṇairbhūṣitāṅgam |
śubhrābhaṃ candracūḍaṃ gajavaravadanaṃ puṇyadā pāpahantrī
saṃrājatpārśvayugmaṃ mama hṛdi karṇīgaṇeśaṃ bhaje.aham ||

**84 muhūrtagaṇapatiḥ**

svarṇābhaṃ sandadhānaṃ varadamabhayadaṃ padmayugmaṃ karābhyāṃ
dedīpyatpītavastraṃ maṇigaṇakhacitairbhūṣaṇairbhūṣitāṅgam |
jyotirvidyāsametaṃ gajavaravadanaṃ candracūḍaṃ trinetraṃ
jyotiścakrasya madhye nilayamatha muhūrtābhidhaṃ cintayāmi ||

**85 kapardīśa gaṇapatiḥ**

bibhrāṇaṃ kamalaṃ karaiśca paraśuṃ pāśāṅkuśau tundilaṃ
śuṇḍāśobhi sudhāghaṭaṃ śaśidharaṃ dedīpyamānaprabham |
gaṅgāpūrvasarasvatī parilasadvāmāṅkakaṃ sundaraṃ
nāgāsyaṃ jaṭilaṃ kapardigaṇapaṃ dhyāye sudhāṃśuprabham ||

**86 piṅgaḻagaṇapatiḥ**

kandarpānantatulyaṃ trinayanasahitaṃ tundilaṃ smeravaktraṃ
śuṇḍādaṇḍe dadhānaṃ dhavaḻatilakṛtaṃ modakaṃ candracūḍam |
bibhrāṇaṃ pakkvacūtaṃ paraśumatha karaiḥ kalpavallīkṣudaṇḍe
taṃ śrīdevyā samṛddhyā sahitamibhamukhaṃ piṅgaḻākhyaṃ bhaje.aham ||

**87 caturdanta gaṇapatiḥ**
śuṇḍāyāṃ ca sudhāghaṭaṃ svaparaśuṃ
pāśāṅkuśau paṅkajaṃ
bibhrāṇaṃ yugabāhubhiḥ śaśidharaṃ
śubhrāṃśukoṭiprabham |
dedīpyatprabhavedadantakhacitaiḥ
ratnairmanojñaprabhaṃ
nāgāsyaṃ hyanaghāvyayāyutamahaṃ dhyāye
caturdantakam ||

**88 vāmanagaṇapatiḥ**
cakrābjāṅkuśapāśaśaṅkhaparaśūn
dantāsicāporagān
bibhrāṇaṃ śikhivāhanaṃ śaśidharaṃ
mālālasatpuṣkaram |
hrasvagrīvamibhānanaṃ ca jaṭilaṃ
svarṇaprabhaṃ sundaraṃ
dhyāye vāmanasaṃjñakaṃ hyaṇumahadrūpāyutaṃ
tundilam ||

**89 citraghaṇṭā gaṇapatiḥ**
nāgāsyaṃ navaratnabhūṣaṇayutaṃ
śvetāmbarālaṅkṛtaṃ
śuṇḍayāṃ kamalaṃ ca pustakaguṇau
ghaṇṭāṅkuśau bāhubhiḥ |
bibhrāṇaṃ śaśiśekharaṃ trinayanaṃ
śītāmśuśubhraprabhaṃ
dhyāye nādasarasvatī yutamahaṃ
śrīcitraghaṇṭābhidham ||

**90 caṇḍoddaṇḍa gaṇapatiḥ**

krūrāsyaṃ bhīmakāyaṃ
śarabhavarakhagārūḍhamindropalābhaṃ
vetālaṃ pānapātraṃ paraśusṛṇiguṇān
khaḍgakheṭe triśūlam |
bibhrāṇaṃ vakravaktraṃ gajavaravadanaṃ
candracūḍaṃ trinetraṃ
caṇḍoddaṇḍābhidhānaṃ mama hṛdi kalaye
raktavastrāṅgarāgam ||

**91 pracaṇḍa gaṇapatiḥ**

cāpaṃ bāṇaguṇāsikheṭaparaśūn padmāṅkuśau
bāhubhiḥ
bibhrāṇaṃ śaśiśekharaṃ trinayanaṃ
raktāmbaraṃ tundilam |
dedīpyannavaratnaguptaradanadvandvaprabhāśo
bhitaṃ
sindūrāruṇabhaṃ pracaṇḍagaṇapaṃ
stambheramāsyaṃ bhaje ||

**92 kūṭadanta gaṇapatiḥ**

aṅkuśaṃ pāśakaṃ modakaṃ puṣkare
bibhrataṃ hīnadantadvayaṃ nāgakaḥ |
taṃ varābhītisaṃśobhidantadvayaṃ
kūṭadantābhidhaṃ svarṇabhaṃ cintaye ||

**93 śoṇabhadra gaṇapatiḥ**

śaṅkhapadmanidhijvalannijapārśvakaṃ gajamastakaṃ
bibhrataṃ guṇamaṅkuśaṃ paraśuṃ karaiḥ kamalaṃ tathā |
śoṇabhadrasamaprabhaṃ pṛthuratnakumbhasupuṣkaraṃ
śoṇabhadraśilodbhavaṃ bhaja dehaḻībhavavighnapam ||

**94 guṇeśa gaṇapatiḥ**

rājanmodakasavyahasyasumahāśuṇḍaṃ gadāṃ tatra ca
tiṣṭhantaṃ ca caturbhujaṃ vararadaṃ pāśāṅkuśau bibhratam |
sindūrāruṇavigrahaṃ gajamukhaṃ raktāmbaraṃ tundilaṃ
taṃ caiko.abhayadaṃ namāmi gaṇapaṃ śrībhuktimuktyānvitam ||

**95 raktagaṇapatiḥ**

raktābhaṃ śūlacakre paraśusarasije vrīhipāśekṣucāpaṃ
śuṇḍāyāṃ ratnakumbhaṃ dadhatamathagadāmaṅkuśaṃ cotpalaṃ ca |
raktāsyaṃ siṃhavāhaṃ sahitamabhimukhaṃ sundarī bhāratībhyāṃ
dhyāye muktāvibhūṣaṃ mṛgamadatilakaṃ candracūḍaṃ trinetram ||

**96 pravālagaṇapatiḥ**
ibhānanaṃ śaśāṅkaśekharaṃ japāruṇambaraṃ
sudīptaratnabhūṣaṇaṃ vibhinnadantamīśvaram
|
pravālavighnanāyakaṃ ca sarvahṛdyabodhinī-
vinaṣṭavastudāyinī yutaṃ daśāyudhaṃ bhaje
||

**97 dharaṇīdhara gaṇapatiḥ**
digbāhuṃ śaśiśekharaṃ trinayanaṃ
raktāmbaraṃ tundilaṃ
dīptaṃ
mauktikahāraratnamakuṭairbhagnaikadantaṃ
prabhum |
ādhārākhyasarasvatī sahitayā cādhāralakṣmyā
yutaṃ
raktābhaṃ dharaṇīdharaṃ hariratham
nāgānanaṃ cintaye ||

**98 varadagaṇapatiḥ**
bījāpūraviṣāṇadaṇḍakamalān cāpotpale
sadrujāṃ
pāśaṃ cakrakaratnapūrṇakalaśaṃ padmaṃ
karairbibhratam |
raktaṃ siṃharathaṃ gajendravadanaṃ
pītāmbaraṃ tundilaṃ
dhyāye śrīvaradābhidhaṃ varadayā vāṇyā ca
lakṣmyā yutam ||

**99 dvāragaṇapatiḥ**

japāpuṣpabhāsaṃ guṇaṃ jīvaratnaṃ
radaṃ modakākhyaṃ sudhāpūrṇakumbham |
dadhānaṃ karairdvāralakṣmīsametaṃ
gajāsyaṃ trinetraṃ bhaje dvārasaṃjñam ||

**100 bhūmigaṇapatiḥ**

andhaḥpūrṇasuvarṇapātraradane
śālyagrasaddāḍime
bibhrāṇaṃ smarakoṭisundaratanuṃ nāgānanaṃ
tundilam |
śuṇḍāyāṃ navaratnakumbhasahitaṃ
pītāmbarālaṅkṛtaṃ
dhyāye bhūmigaṇādhipaṃ śaśidharaṃ
śrīhyannalakṣmīyutam ||

**101 muktāgaṇapatiḥ**

muktāmālāvibhūṣaṃ
navamaṇikhacitairbhūṣaṇairbhūṣitāṅgaṃ
haste pīyūṣakumbhaṃ dadhatamabhimukhaṃ
nīlavarṇaṃ trinetram |
muktāśaktiṃ sarojaṃ guṇanijaradanau
dhārayantaṃ karābjaiḥ
muktālakṣmīsametaṃ maṇimayamakuṭaṃ naumi
muktāgaṇeśam ||

**102 durmukha gaṇapatiḥ**

bhūmipātita śambhupṛṣṭhaga
savyajānumibhānanaṃ

śambhuśīrṣagaśūlaśobhibhujadvayaṃ guṇamaṅkuśam |
cittavṛttimayīyutāmatha cittaharṣaviṣādadadāṃ
bibhrataṃ nijapārśvayorbhaja durmukhaṃ ca caturbhujam ||

**103 candanagaṇapatiḥ**

kastūrīmṛgavāhanaṃ gajamukhaṃ sadraktagandhākṛtiṃ
kalhārotpalapaṅkajekṣudhanurapyāraktamālāṃ gale |
śuṇḍāyāṃ ca dadhānamindumakuṭaṃ netratrayaṃ sundaraṃ
dhyāye candanasaṃjñakaṃ tilavāṇī gandhalakṣmīyutam ||

**104 sumaṅgalagaṇapatiḥ**

ikṣūdbhūtaśarāsanaṃ nijakaraiḥ puṣpeṣupāśāṅkuśān
bibhrāṇaṃ ca sumaṅgalīpriyasutaṃ nāgānanaṃ sundaram |
raktaṃ candrakalādharaṃ trinayanaṃ kṣemaṅkarī maṅgalā
saṃyuktaṃ kalaye sumaṅgalagaṇādhīśaṃ sadā cetasi ||

**105 mitragaṇapatiḥ**

taptasvarṇasamānakāntiruciraṃ pītāmbaraṃ tundilaṃ

bibhrāṇaṃ pṛthumodakaṃ varakare dantaṃ ca padmadvayam |
prajñākāntisamanvitaṃ maṇigaṇairdedīpyamānaprabhaṃ
mitrākhyaṃ gaṇanāyakaṃ gajamukhaṃ bhagnaikadantaṃ bhaje ||

**106 kṛṣṇagaṇapatiḥ**

śaṅkhaṃ cakraviṣāṇamodakamapi svīyaiḥ karairbibhratam
kālāmbhodanibhaṃ sukaustubhayutaṃ pītāmbaraṃ tundilam |
rādhākṛṣṇavarapradaṃ trinayanaṃ vidyāvibhūtīyutaṃ
nāgāsyaṃ śaśiśekharaṃ gaṇapatiṃ kṛṣṇābhidhaṃ bhāvaye ||

**107 kūṣmāṇḍagaṇapatiḥ**

nāgāsyaṃ vṛṣavāhanaṃ śaśidharaṃ kūṣmāṇḍatulyaprabhaṃ
nānābhūṣaṇaśobhitāṅgaruciraṃ kūṣmāṇḍatulyaprabham |
bibhrāṇaṃ triśikhaṃ kapālaḍamarū pāśaṃ bhujaistundilaṃ
dhyāye śrīgaṇanāyakaṃ trinayanaṃ kūṣmāṇḍamuṇḍābhidham ||

**108 bhīmacaṇḍī gaṇapatiḥ**

kandarpānantakāntaṃ pṛthutarajaṭharaṃ
pītavastrottarīyaṃ
vīṇācakrākṣamālā triśikhaśukadhanuḥ
pustakeṣūn dadhānam |
aṣṭābhirbāhupadmaiḥ śaśadharamakuṭaṃ
kīravāhaṃ trinetraṃ
dhyāye vetaṇḍatuṇḍaṃ marakatamaṇibhaṃ
bhīmacaṇḍīgaṇeśam ||

**109 mārgasahāya gaṇapatiḥ**
sahasrāradantau rujāṃ bījapūraṃ
dadhānaṃ bṛhanmodakaṃ puṣkare ca |
gajārūḍhamādyaṃ ghanaśyāmavarṇaṃ
bhaje.ahaṃ ca mārgeśasaṃjñaṃ gaṇeśam ||

**110 kukṣigaṇapatiḥ**
japāpuṣpabhāsaṃ svapāśāṅkuśāḍhyaṃ
varābhītihastaṃ radaṃ cābhaye tu |
dadhānaṃ saraṃdhrodaraṃ pīnakukṣiṃ
bhaje kukṣisaṃjñaṃ gaṇeśaṃ gajāsyam ||

**111 bhakṣapriya vṛddhagaṇapatiḥ**
sannārikelakadaḻiguḍapāyasaṃ ca
cūtaṃ dadhānamaniśaṃ śaśiśubhragātram |
nāgānanaṃ śaśidharaṃ nayanatrayāḍhyaṃ
vṛddhābhidhaṃ gaṇapatiṃ bhaja bhakṣasaṃjñam
||

**112 śūlaṭaṅka gaṇapatiḥ**

śyāmavarṇakāyaminduśekharaṃ caturbhujaṃ
śūlaṭaṅkapāśadantadhāriṇaṃ trilocanam |
ratnaguptakaṅkaṇaṃ kirīṭahāraśobhitaṃ
śūlaṭaṅkanāmakaṃ gaṇadhipaṃ sadā bhaje ||

**113 nṛsiṃhagaṇapatiḥ**
japāpuṣparaktaṃ sahasrāraśūle
dadhānaṃ ca pāśāṅkuśau bāhubhiḥ svaiḥ |
pravīrāsanasthaṃ trinetraṃ sacandraṃ
bhaje tīkṣṇadaṃṣṭrānanaṃ siṃhavaktram ||

**114 brahmagaṇapatiḥ**
padmaṃ daṇḍakamaṇḍalū ca paraśuṃ
pāśākṣamālāṅkuśān
bibhrāṇaṃ nijapustakaṃ vasukaraiḥ
svarṇaprabhaṃ tundilam |
hastīndrāsyacatuṣṭayena sahitaṃ
pītāmbarālaṅkṛtaṃ
dhyāye śrīcaturānanābhidhamahaṃ
śaktitrayenānvitam ||

**115 gaṇaka gaṇapatiḥ**
sphaṭikadhavalagātraṃ pustakaṃ cākṣamālāṃ
kamalavaradahastaṃ jñānamudrāṃ dadhānam |
jananatimirasūryaṃ cārucandrāvataṃsaṃ
viditasakalatattvaṃ haṃsarūpaṃ namāmi ||

**116 kalipriya gaṇapatiḥ**
vājivāhanaśobhitaṃ varakañcukadvayabhāsuraṃ

vṛttabhāsurapīvarālakaveṣṭanānvitamastakam
|
raśmitotrakaradvayaṃ manujānanaṃ
smarasundaraṃ
śvetavarṇakalevaraṃ bhaja taṃ
kalipriyavallabham ||

**117 kālānalapraśamana gaṇapatiḥ**
brahmendrarudramukhaidevairvṛtaṃ
bhujagarājodaraṃ munigaṇaiḥ
dūrvārcanena parituṣṭaṃ varābhayadahastaṃ
sarojamabhaye |
āliṅgyantamatipārśvasthite amṛtavāṇīrame
śaśidharaṃ
śvetavarṇaṃ naravaktraṃ smarāmi hṛdi
kālānalapraśamanam ||

**118 mantragaṇapatiḥ**
nāgāsyaṃ śaśiśekharaṃ trinayanaṃ mālāṃ
suraktāṃ gale
śuṇḍāyāṃ pṛthumodakaṃ vararade pāśāṅkuśau
bibhratam |
raktābhaṃ hṛdi mantrasaṃjñagaṇapaṃ
bhagnaikadantaṃ prabhuṃ
saṃyuktaṃ bhaja mantrasiddhiyutayā
śrīmantravidyākhyayā ||

**119 dūrvāgaṇapatiḥ**

mālādantābjayuktaṃ paraśuyutakaraṃ
vedabāhuṃ trinetraṃ
dūrvābhaktyā ca tuṣṭaṃ maṇimatha makuṭaṃ
ratnagandhānuliptam |
raktābhaṃ mokṣalakṣmyā sahitamabhimukhaṃ
jñānavidyākhyayā ca
dhyāye dūrvāgaṇeśaṃ śaśadharamakuṭaṃ
tundilaṃ taṃ trinetram ||

**120 phālacandra gaṇapatiḥ**

sindūrāruṇavigrahaṃ sukumudaṃ sañjīvinīṃ
dāḍimaṃ
dantaṃ bāhubhirādadhānamaniśaṃ
pīyūṣakumbhaṃ kare |
nāgāsyaṃ śaśiśekharaṃ trinayanaṃ
raktāmbarāḍhyaṃ mṛta-
sañjīvinyāmṛteśvarīyutamahaṃ taṃ
phālacandraṃ bhaje ||

**121 yoganidrā gaṇapatiḥ**

bandhūkāruṇavigrahaṃ dviradanaṃ pāśāṅkuśau
mālikāṃ
bibhrāṇaṃ nijabāhubhirgajamukhaṃ
raktāmbaraṃ sundaram |
nidrāyogayutaṃ ca yogagaṇapaṃ
yokaigalabhyaṃ bhaje
devaṃ buddhisarasvatī sahitayā
śrīyogasiddhyā yutam ||

**122 saṃkhyagaṇapatiḥ**

muktāvarṇaṃ gajavaramukhaṃ candracūḍaṃ trinetraṃ
mokṣādhīśaṃ varamabhayadaṃ hyaṅkuśaṃ pāśavaryam |
buddhyā siddhyā ca sahitaṃ jñānamokṣabhidhābhyāṃ
dhyāye nityaṃ gajamukhayutaṃ saṃkhyasaṃsthaṃ gaṇeśam ||

www.kamakotimandali.com